मुक्ताकङ्कणकान्तिभिः कुसुमिता वीरश्रियो वेणिका ॥

यस्य किल समाप्यायां -

यशःकलशसिन्धुराट् कुमुदबान्धवा बान्धवाः-
प्रबन्धकविसिन्धुरप्रणयदायका गायकाः ।
चतुर्दशकलारसोल्लसनभासुरा भूसुराः-
भवन्त्यमृतमाधुरीभरितभाषितायोषितः ॥

नटी -चिरंदणरुवअजादं उव्झि अहिणवम्मिणाडअम्मि कुदो अहिणिवेसो ।
[चिरन्तनरूपजातं उज्झित्य अभिनवमिदं नाटकं अपि कुतो अभिनिवेशः ।]

सूत्रधारः -

प्रतनादपि नूतनं मनोज्ञं
प्रचुरीभूतमलङ्क्रिया गुणैश्चेत् ।
तरुणीमपहाय भासुराङ्गीं
रसिकानां जरती रतिःकुतस्याः ॥

नटी – को एसो वेषहुखव्ग .पदाहि हे ओ महाराओ
[क एषः वेषदुःखपताकिको महाराजः ।]

सूत्रधारः –भद्राचले श्रीरामभद्रो कयोश्चिद्राज-दम्पत्योस्तपसा प्रसादितः स्वप्ने नन्दकाख्य आत्मीयं खड्गमदिशत् । गीर्णः स एव पुत्ररूपेण पर्यणंसीत् । ततः पितृभ्यां नन्दक इत्यभिहितः प्रतिदिनसमेधमानमूर्तिराशान्तविश्रान्तकीर्ति-रवर्धिष्ट ।

नटी – (सप्रत्यभिज्ञं) अव्अजो खु स अलमिलि छचक्कवट्टि पबलबलाबलेव वि अडाडविप्पज्ज-लिदक्सणवत्सीकिदाणि अभुअमहापदावोत्तिघण विदरणगुणमिलाविदकव्यरुक्खपहावोत्ति असेस-दिसाव आसेसुसुणी अदिकिंसोव्चि अएसो अव्छरि अं । अं अ उव्तकिव्णामहेअं एदं-रूवअं ।
[आर्य ! यः खलु सकलं म्लेच्छचक्रवर्तिप्रबल-बलावलेपविकटाटवीप्राज्वलितकृष्णवर्त्मीकृत-निजभुजमहाप्रताप इति घनवितरणगुणम्लायित-कल्पवृक्षप्रभाव इत्यशेषदिशावकाशेषु श्रूयते; किं स एवैष आश्चर्यम् । ततस्ततः । किं नामधेयकमेतद्रूपकम् ।]

सूत्रधारः – कलावती नन्दकमिति ।

नटी – अव्अउव्तदाणिं णव्टसामव्गी भलिदव्व ।
[आर्यपुत्र! इदानीं नाट्यसामग्री फलितैव।]

सूत्रधारः – (सहर्षं)

परिषदियमभिज्ञा पक्षपातानभिज्ञा
सरसिजमकरन्दस्यन्दिसूक्तिप्रबन्धा ।
परिमलितदिगन्तपुष्पगन्धैर्वसन्त-
श्शुभनिधिरधिनेतातद्विधातेष्टदाता ॥

नटी –

उव्जाणकुव्जि अंब अकिसलअदलभुव्ति मव्तकलकंठो।
णवपोव्मगंधबंधुरगंधवहव्ढो विभादिमहुमासो ॥
[उद्यानकुब्जिताम्रककिसलयदलभुक्तिमत्तकलकण्ठः ।
नवपद्मगन्धबन्धुरगन्धवहाढ्यो विभाति मधुमासः ॥]

सूत्रधारः – (सपरितोषं)

नटनोद्यममस्माकं सुरभिर्वक्तुं समायातः ।
नन्दकनरपतियात्रासमयंमौहूर्तिक इवैषः. ॥

[इति निष्क्रान्तौ]

प्रस्तावना

[ततः प्रविशति मौहूर्तिकः]

मौहूर्तिकः -

प्रातः प्रबुध्य परिचिन्त्य चिरं शिवायाः-
कान्तं निमज्य कृतजप्यहुताग्निहोत्रः ।
पूजां शिवस्य विरचय्य च पूतचेताः
भूपालदर्शनकृते निरगाम गारात् ॥

(स्मरणमभिनीय) आदिष्टोऽस्मि सविशेषमद्य निरवद्य कार्यगौरवेण, सरभसं प्रस्थातुकामेन, महाराजेन मुहूर्तनिर्धारणे ।

(विमृश्य, सपरितोषं)

ज्योतिश्शास्त्ररहस्यवेदनकलावैज्ञानिकस्मन्मनो
निर्णीतक्षणनिर्गमात्तविविधाभीष्टार्थसन्तोषिणा ।
अंहत्यल्पितकल्पकावनिरुहाराज्ञावितीर्णैर्गृहं
सम्पूर्णं मम पारितोषिकभरैरन्यत्किमाशास्यते ॥

(पुनर्विमृश्य) पुरैव विजयोत्सवेन निःशेषदिशां स्व- विषयनिर्विशेषीकृततया न जेतव्यदिशावकाशः ।

तथाहि -

मुकुलितकराम्भोजा भोजा इमे पुरतःप्रिया
रतिषु विगता सङ्गावङ्गाश्चिराय नियन्त्रिताः ।
इह हि जगती तुच्छाम्लेच्छावतंसितपाणयः-
परिभवपतच्चान्ड्याः पाण्ड्या नृपालमुपासते ॥

एवमन्येऽपि । तथापि -

आकस्मिकप्रस्थानं निशम्य मुग्धं मनस्सन्धिग्धे ।
जिगमिषुणा प्रभुणा का वा दिगलङ्करिष्यते ॥

केनजानपदेन जनेन दर्शनसुखमनुभूयचक्षुष्मत्त सपत्नीकरिष्यते; कैर्वानुचरैर्विरहपर्युत्सुकताम- पहाय कालो विनेष्यते । भवतु ! कलुषिताशयेन कृतं विशयेन । कदाचिदप्यवधीर्य मामेष न निर्याति । नहि तरणिररुणं पुरस्कृत्योदेति किन्तु गमनकारण जिज्ञासया हृदयमाकुलीभवति (परितोऽवलोक्य) न कोऽपि नयनाऽऽतिथिर्भवति राजरहस्यवेदी । भवतु राजभवनमेव गत्वा ज्ञातव्यम् ।

(इति परिक्रामति)

[ततः प्रविशति सत्वरं व्रजन्नेवोष्णीषं बध्नन्मन्त्रिपुत्रः]

मौहूर्तिकः - (मन्त्रिपुत्रं दृष्ट्वा) सखे ! मणिशेखर ! कुतस्तवायमावेगः । यन्नेदीयांसमपि मामनिशांयैव गम्यते ।

मणिशेखरः-(परिवृत्यावलोक्य) अहो ! सिद्धान्तवेदी। सखे ! सिद्धान्तवेदीन् महाराजः किमपि कार्यमुद्दिश्य मन्त्रयितुं सभाङ्गणमलङ्करोति । राजकार्य गरीयस्त्वादन्तरेण सरणिमन्नितरोपलम्भं क्रममाणस्तवोपालम्भे निपतितोऽस्मि । आकस्मिकयात्राकारणं जिज्ञासमानस्य मम पुनरिदमप्येकमापतितम् ।

मणिशेखरः - तन्निमित्तमेवेदं ।

सिद्धान्तवेदी - यदि तत्कार्यं गोपनीयं ममापि श्रवणाभरणीक्रियताम् ।

मणिशेखरः - सखे ! किं तवापि गोप्यमस्ति ? राजरहस्यतया रसना नियम्यते ।

सिद्धान्तवेदी - आबाल्यादेकमेवावयोर्हृदयम् । अतः निश्शङ्कमेवाभिधीयताम् ।

मणिशेखरः - तर्हि श्रूयतां समासतः । कदाचिदाज्ञया महाराजस्य निखिलहरिदन्तसमान्तनृपोदन्त

विविदिषया तत्र तत्र कृतसञ्चारेषु चारेषु दिल्ली
नगरात्कृतनिवृत्तेः चिरपरिचितचेटीजल नावेदितान्त
पुरप्रवृत्तेर्गूढपुरुषादखिलतरुणीकुल ललामभू
ढिल्लीपतिसुताकन्दर्पजय पताकिका कलाव
नाम निवसतीति समाकर्ण्य तत्कालजनु
स्मृतिजनुषा दृढमुक्तबाणपातनितान्तक्लान्तान्तः
करणतया परिजनप्रयत्नप्रवर्तितदिनकृत्य
कृत्यविदामग्रणीरपि तत्रेतिकर्तव्यतामनिश्चिन्वान
कल्पसदृशक्षणकालप्रसराणि कतिपयवासराणि
साकारगोपनमतिवाहयन्नवतस्थे ।

सिद्धान्तवेदी - तादृशस्यापि श्रवणमात्रेण तादृशी देशेऽति
प्रमुग्धोऽस्मि ।

कल्लोलप्रसरत्कटाक्षलहरी जृम्भद्धनुष्मद्भुव-
स्पर्धोत्कस्मरकोटिशैलतनया साकूतदृष्टोऽपि सन् ।
यः कामं तृणवद्ददाहत मृते कामान्तकं हन्त ! भो-
कान्ता श्रान्तकथापथैकरसिकःकः कामजेता भवेत् ॥

ततस्ततः -

मणिशेखरः-अत्रान्तरे कलावती प्रियसखी चन्द्रिका
नाम वृषगिरिपतिसेवाव्याजादत्रागत्य प्रत्यव-
बोधितचिरप्रमुषितबन्धुभावया स्वाशय कथनेन
द्विगुणीकृतसौहार्दया ताम्बूलकरङ्कवाहिन्या
बुद्धिमत्या तत्क्षणमेव समक्षं प्रापिता सखीवृत्त
राज्ञे विज्ञापयामास ।

सिद्धान्तवेदी – (साश्चर्यं) किमिति ?

मणिशेखरः –एकदा मम सखी रहसि कथा प्रसङ्गेषु कीर्त्यमानेषु राजसु भवद्गुणगणाय स्पृहयन्ती सकृदनुभूततया नक्तमुषेवानिरुद्धं स्वप्ने भवन्तमनुभूय भूयसा प्रेमभरेण निभृतमश्रान्तचिन्तया च सन्ततमाक्रान्त स्वान्ततया पुनरपि स्वप्नदर्शनाय निद्रामप्यलभमाना सुलभमाना परिजनव्यापारेषु विरहकृशतया लावण्यमात्रशेषावयवा मुग्धतया सखिष्वपि निवेदयितुमक्षमा रहसि परिचितिबलेन मन्मात्रनिवेदितहृदया क्षणमपीतः परमनुपेक्षणीयेति निश्चित्य दृढमत्यवलम्बनेन ।

सखि ! समाश्वसिहि तं महाभागमिहानेष्यामि, माभैषीरिति स शपथं प्रतिश्रुतवतीं मां (सद्यस्समुत्थाय शतशः प्रणिपत्य पाणिना चरमतनुं समालभ्य दृढं परिरभ्य च) सखि ! किं वदिष्यामि ममासवस्तवकर इति व्याहृत्य– प्रेषयामास ।

आपन्नप्राणिसंरक्षादीक्षितेन विपश्चिता ।
स्वानुरक्ताबला रक्षाविधेयैव विशेषतः ॥ इति ।

सिद्धान्तवेदी –

"स्वमदृष्टि श्रुतिश्चैवमुत्कण्ठाकारणं यदि"।
अन्योऽन्यदृष्टावनयोरवस्था कीदृशी भवेत् ॥

ततस्ततः -

मणिशेखरः -(तदाकर्ण्य कर्णामृतं निरतिशय प्रीति विस्फारितेन चक्षुषा तामनुक्षणमीक्षमाणः तत्समक्षमेव सभायामवस्थातुं मन्त्रनिर्धारणाय मन्त्रिजनमुपस्थातुमप्यपारयन्तं ततस्तया सह प्रस्थातुमारभे)

सिद्धान्तवेदी - (सखेदं)

निर्विकल्पं श्रुतवतः सविकल्पश्रुतिर्यदि ।
मत्तस्यैव स्वतःपूर्वं मदिरा समुपस्थिता ॥

किञ्च -

नारीति श्रवणे कुतश्चनमनो येनानुरक्तंभवे-
त्सा पश्चात्तरुणीति हन्त ! नियतं संस्पृष्टमुत्कण्ठया ।
अन्ते त्वय्यनुरागिणीति तु परंकन्दर्पबाणार्दितं
तत्ताद्दग्जनयन्त्रणाय पुरुषःकल्पेत जल्पेत कः ॥

उत्पथप्रवृत्तमेनं मन्त्रिणः कथं निरुंध्युः ।
तत्ताद्दक्तरुणी ललामहृदयाऽऽसक्तिश्च तस्यात्मनि
स्वैरं तच्छ्रवणं च तत्परिजनात्तारुण्यपूर्णं वपुः ।
स्वातन्त्र्यं निरवग्रहं भुजबलं युक्ताबलादाहृति-
र्जाल्म त्वं यदि तस्य तन्नियमने धाताऽऽपि मन्दोद्यमः ॥

ततस्ततः -

मणिशेखरः - तदनुविदितकृत्यैरविनाभूतैकमत्यैरमात्यै-रनुनीतः सारग्राहितया समीक्ष्य कारितामेव सम्मन्वानस्तन्वानःस्तत्कालोचितं सखी प्रत्ययार्थं प्रार्थनयादत्तस्वहस्तलिखितचित्रपटां चन्द्रिकां तदनुमत्या बुद्धिमत्या सह प्रजिगाय ।

सिद्धान्तवेदी -. (सविमर्श) चन्द्रिकावचनेनैव सञ्जातं महाराजस्य निरवद्यं कार्यवैशद्यम् । बुद्धिमती-प्रेषणं तु स्वस्य समीक्ष्यकारितादिदर्शयिषयैव । सापि नूनं अद्य श्वो वा समायायात् । असावपि तदागमन समनन्तरमेव प्रयायात् । दिष्टयाऽऽवरोपितो मन्त्री भारो, मौहूर्तिक-भारश्च ।

ततश्च -

न किमप्यावयोरद्य विधानं कालकार्ययोः ।
यत्र याति सतत्रानुसरणं शरणं परम् ॥

मणिशेखरः -. सापि समागता इति अश्रौषम् ।

सिद्धान्तवेदी - (सरभसमुत्थाय) सखे ! त्वरस्व । अयमेव प्रस्थानसमयः । दिष्टयानेन समीचीनेन भवितव्यम् । अथवास्य बलीयस्त्वं कल्पनीयम् । सर्वधा निरवलम्बो विलम्बः । अहमप्यनु-पदमागच्छामि ।

[इति निष्क्रान्तौ]

[शुद्धविष्कम्भः]

[ततः प्रविशत्युपविष्टः सचिन्तः सपरिवारा राजा]

राजा -(विचिन्त्य)

धर्मार्थं विफलं यदि प्रयतनं काचिन्नहानिर्भवे
दर्थार्थं तु धनव्ययस्तनुतरस्तन्वाःप्रयासोऽपि च ।
मोक्षार्थं श्रवणादिभिर्लघुतरैः क्षिप्येत कालःसुखं
कामार्थं तु परिप्लवं बत मनो जायेत दूयेत च ॥

मणिशेखरः - तत्किल .लोके यत्नवैफल्यनिश्चये ।

राजा - (क्वचित्यसंशयेऽपि । स च प्रकृते)
तया चन्द्रिकया साकं प्रेषिता बुद्धिमत्यपि ।
दुर्घटत्वात्तु कार्यस्य किमागत्य वदिष्यति ॥ इति ।

मणिशेखरः - मास्तां यत्नवैफल्य संशयौ ।
यद्यभिनिवेशपात्रं महदपि वस्तु स्वतः सतो भवति ।
यत्ने महत्यपि कृते लघ्वपि च स्यात्पृथग्जनस्यैव ।

राजा - आश्वासनमात्रमेतत् । सर्वेषामपि सर्वेष्वा
कार्येषु यत्नेन भाव्यम् । तस्मिन्कृ
कदाचित्संशयेनापि । "यत्नैर्विना नहि भवन्ति
समीहितार्थाः यत्ने कृते यदि न सिध्यति कोऽ
दोषः" इत्यभियुक्तोक्तिः अत्र प्रमाणम् ।

मणिशेखरः - स प्राकृताविषय एव न प्रकृत विषयः
एतावतैव भवतः सिद्धप्राये समीहिते ।
कामार्थत्विति या चिन्ता साध्य दूरे विपद्यताम् ॥

राजा-एतावतैवेत्यनेन बुद्धिमती प्रेषणेन कार्यसिद्धि
माशंससे । तन्न तथा -
घटकादलमन्यस्यस्वस्मिन्कान्तानुरागविज्ञानम् ।
तन्मुख्यतयास्माकंवाञ्छति चेतः स्वतो ज्ञातुम् ॥

देवसेनः - कामिनः सर्वेऽपि दूतीमुखेनैव संदधते ।

राजा - देवसेन तत्केवलं कामित्वं पुरस्कृत्य प्रवृ
न तु तत्वेऽपि रसिकसखस्त्वम् । ते

समीहितसिद्धिर्नाम दयितावाप्तिः । अपि तु स्वेन तदनुरक्तिपरिज्ञप्तिः ।

आसक्तेति निजप्रयोजनवशादारञ्जयद्दूतिका
वाचा वागुरिकाधृतानरमृगास्तिष्ठन्त्वलं तत्कथा ।
निर्व्याजप्रणयप्ररोहतरुणीभावःस्वतश्चेद्रहः
सन्दष्टः किल सैव मे रसिकता धौरेयता सम्मता ॥

ततश्च -

स्थानभेदेनयुष्माकमस्माकमपि भावयोः ।
कथं भवेद्व्यतिकरः तेजस्तिमिरयोरिव ॥

राजा - (स्मरणमभिनीय) बुद्धिमती किं विलम्बते ।

[प्रविश्य]

बुद्धिमती - जेदु महाराओ । [जयतु महाराजः ।]

(सर्वे सपरितोषमवलोकयन्ति)

मणिशेखरः - मुखप्रसाद एवास्याः कार्यसिद्धि-मनुमापयति ।

देवसेनः -

देवीयसापि कालेन भवदिष्टं प्रसिध्यति ।
झटित्यागमनं त्वस्याः शीघ्रसिध्यनुमापकम् ॥

विदूषकः - (साधिक्षेपं) ठिदेपुव्छिदव्वेजणे किं वि किं वि समत्थणं ।
[स्थिते प्रष्टव्ये जने किमपि किमपि समर्थनम् ।]

राजा –विकटोऽपि सम्यग्ब्रवीति । .

यतः –

अपृष्ट्वैव विशेषज्ञमन्यथा न समर्थ्यताम् ।
समर्थितविपर्यासे त्रपा सम्पद्यतेतराम् ॥

[बुद्धिमती प्रविशति]

बुद्धिमती – महाराअणि ओ एणतव्थगव्तूण सव्वंपव्चव्खी किदं । ठाणे खु देव्वव्स अणुराओ जदो साकव्पा आमणी रामणी अ एव्णतिहुवण रमणी ओसन्चं अइरिव्चइ । त एवि अणु रावोण परिव्छेद विस ओज दोणि हिं वि अमं पेछंपेछंती तु ह्य बुव्धी एसपव्जादि अंस अं एव्वविरइदवदी । चन्दि आ विकादव्वं सव्वं सूइदवदी राअ दारि आतु ह्मकि–देमअणाणलसंतव्ताजारिसं अवव्थंदरं संपव्तातं संरवेणभणामि । चन्दोद अव्खु हिं आस अर पूरणं तणेतं बुसोव्तपडि सिन्तथणव त्थलीसा ला अव्णसेसकिसपंडरतव्त गव्तीबोले–इकव्पमणिमेसदएव्वरव्तीं ।

[महाराजवियोगेन तत्र गत्वा सर्वं प्रत्यक्षीकृतम्]
स्थाने खलु ! देवस्यानुरागः ।

यतः –

सा कन्यकामणी रामणीयकेन त्रिभुवनरमणी सत्यमतिरिच्यते । तस्या अप्यनुरागोणा परिच्छेदविषयः । यतो निधिमिव मां पश्यन्ती

युष्मद्बुध्या सपर्यादिकं . स्वयमेव विरचितवती । चन्द्रिकापि कर्तव्यं सर्वं सूचितवती राजदारिका युष्मत्कृते मदनानल सन्तप्ता यादृशमवस्थान्तरं सम्प्राप्ता तत्संक्षेपेण भणामि ।

चन्द्रोदयक्षुभितसागरपूरनिर्य-
न्नेत्राम्बुस्रोतपरिषिक्तस्तनस्थली सा ।
लावण्यशेषकृशपाण्डरतप्तगात्री
बालेव कल्पमनिमेषतयैव रात्रीम् ॥]

मणिशेखरः - अस्ति किल तादृशवेदनानिवारण-पटुश्चित्रपटः ।

बुद्धिमती - देणखु पइव्ठासु पाणधालणं ।
[तेन खलु प्रतिष्ठासु प्राणधारणम्]
(संस्कृतमाश्रित्य)

पश्यति स्पृशति जिघ्रति क्षणं वर्ष्मबाहुमधरं च जाग्रती ।
निद्रिता यदि चिराय केवलं नित्यमेव निदधाति वक्षसि ॥

राजा - (चित्रपटं लक्ष्यीकृत्य)

भ्रमविषयतदुद्यद्दर्शनाद्युक्तलीला
विलसितकृतकालक्षेपएवाहमस्मि ।
तव तु परममीभिस्तत्कृतैरेव सर्वै-
र्नयनविषयभूतैर्नानृतैर्जायतेऽसौ ॥

बुद्धिमती - इदो वरं णत्थि वत्तवं ।

णलिणिव्वसव्व सव्ति णव्तं चंदं दिवावकेरविणी ।
रव्तिं दिवं भवंतं राअ सु आसरणमिव्छइविणिव्दा ॥

[इतः परं. नास्ति वक्तव्यम् ।

नलिनीव सप्तसप्तिं नक्तं चन्द्रं दिवैव कैरविणी ।
रात्रिं दिवं भवन्तं राजसुता शरणमिच्छति विनिद्रा ॥]

राजा – (सविषादं) एवं मन्दभागधेयस्य मम कृते दुरन्तचिन्तातनीयस्याः प्रेयस्याः मनोविनोदनं किञ्चिदस्ति । मम पुनः स्मरणमेव परं शरणम् ।

बुद्धिमती –(सपरितोषं) देव्वव्सपव्च अव्थं आ सासणव्थंणीसम:भहि अकव्ण आमणी रामणी अआ पदंसणव्थं अमरथव्थिदा एतुह्म पदिकिदिणिरुव मसुदेरविलो अणविह्म अव्थिमिदाएत्ता एपुणो पुणोविविणिव्वंधण चंदि अणि ओरणा अविउव्णो सहव्थलिहिदीचिन्तपदोउवणिदो ।

[देवस्य प्रत्ययार्थं आश्वासनार्थं निःसमाभ्याधिक-कन्यका रामणीयक प्रदर्शनार्थं च मया प्रार्थितया युष्मत्प्रतिकृति निरुपमसौन्दर्य विलोकन-विस्मयस्तिमितया पुनःपुनर्निर्बन्धेन चन्द्रिका-नियोगेन च वितीर्णः स्वहस्तलिखितश्चित्रपटः उपनीतः ।]

राजा – (सहर्षश्लाघम्) सोऽपि किमानीतः ? किं तर्हि परिविष्यहस्तग्रहणम् ।

बुद्धिमती – उत्सङ्गादादाय राज्ञः पुरस्तद्विस्तारयति । (सर्वे साश्चर्यमवलोक्य)

इयं सुन्दरदेहा सा तरुणी रमणी मणी ।
वाणी वा हरिजाया वा काम़वामासुरी किमु* ॥

राजा – (चिरं निर्वर्ण्य) अम्बरमणेरम्बुरुह मित्रताम-सहमानामिव विशकलितस्वरूपतया विरचित-चरणारविन्दमैत्रीकमिन्दुमिव पदकिसल्यप्रकशिता-मिव कोरकप्रकरं नखरसङ्घातमुद्धहन्तीं, अनितर-युवतिजनसाधारणाभिरूप्यप्रवाहमहेच्छमिव कच्छपयुगं प्रपदयुग्ममासेदुषीं, मदनतूणीर-शोभातिलङ्घनजङ्घाल जङ्घाविराजितां, शातकुम्भ-रम्भास्तम्भ स्तम्बेरमशुण्डादण्डौ निजोरुश्रिया निरा-कुर्वतीं, कुसुमायुधकोशभवन घनज-घनकनकमय सालेन मेखलाकलापेन समुल्लसन्तीं, परमाणु-नित्यानुमेयमध्यां, मध्यसाध्यमार्ग निर्गत्वरीं, कुचगिरिपरिसरविसृत्वरीमाखण्डल नीलमणि-श्रेणी विडम्बिनीमिव कादम्बिनीं, अतिविविक्त-मुक्ताहारसुरतरङ्गिणीप्रवाह मोहोपगतां, यमुनात-रङ्गरेखामिव रोमावलिं दधानां शृङ्गारतरुफलाभ्यां रोमरेखालतास्तबकाभ्यां, लावण्यसागरनि-मज्जदुन्मज्जद्युवजनमन समालम्बनजाम्बूनदकल-शाभ्यां, मनसिज महाराजाय तारुण्यमरीचिनिचय-याचकप्रतिपादिताभ्यामिव जम्भलफलाभ्यां, घुसृणमसृणतया सिन्दुरसान्द्रीकृत जम्भरिपुकुम्भी

---

* प्राकृते छायायामपि एवमेव दृश्यते ।

कुम्भाभ्यामिव स्तनाभ्यामवनमकम्रमध्यभागां, मृणालकोमलतान्वितभुजलतां, निरतिशयकुशेशय प्रत्यासन्नेनेव शैवालवलयेन हरिन्मणिमयकर-भूषणेन भूषितकरकमलां, निरुपमान कन्धरापरा-भूत कम्बुडम्बरां, तरुणारुणशङ्काकरताटङ्क-संकलित कुरुविन्दमणिकिरणसन्दोहसन्दा-नितया निरन्तरसङ्क्रान्तकुङ्कुमपत्राङ्कुरयोः कपोलफलकयोर्द्वन्द्वेन समुद्योतमानां, वदन-कुमिदिनीरमणाभ्युदयावसरजाग्रता विग्रहवतेव समग्रसान्ध्यरागेण समधिकतया हृदयमार्गबहि-र्निर्गतेनेवानुरागेण कायकान्ति निकायसमुद्र-विद्रुमशकलेननिजललाटतटकृपीट भवसुलभ-शलभकलभीकृततनोरतनोः, पुनरुदयाय दयावता कृतान्तमथनेनकृतेन वसुधासनाथेन सञ्जीवन किसलयेन दशनवसनेनोपलक्षितां, मुखारविन्द-निष्यन्दमानसौन्दर्यमकरन्द बिन्दुसन्देहजनक नासामणी रमणीयां, वदनरुचिचन्द्रिका समाकृष्टेनैव चकोरमिथुनेन निजप्रतिद्वन्द्वि-श्रवणावतंसेन्दीवरनिरसनामेव तत्पर्यन्तगतेन वदनारविन्द मकरन्दपानागतमिलिन्दयुगलेनेव नयनयुगेन विराजमानां, विंकचमेचक सरोज-प्रभाबन्धुशिरोजबन्धगन्धलुब्धेनेव पुष्पन्धय-बृन्देन चिकुरभिकररुचिरतालहरिसरण्येव वेण्या विरोचमानामेनां चित्रपटे प्रत्यक्षीकरोमि ।

कालमियन्तं सक्तं चित्तं तत्रैव कुत्रचिन्निभृतम् ।
चित्रपटीदर्शनतस्तत इत एतत्परिभ्रमति ॥

आकृतिमात्रालोके सत्यं सैवेति निश्चित्य ।
कृत्यान्तरं न वेद्मि चित्तं कामाग्निसन्तप्तम् ॥

मणिशेखरः - एतादृशसंविधाननैपुण्येन बुद्धिमती यथा निनीषति तथा वयं नेतव्याः ।

विदूषकः - बुद्धिमदि संपत्तं तु बुद्धि सा इव्वपदं । देव्वबलेणपुण्णमणोरहो महाराओ परितोसि अव्ववदेसेण अप्पणोविपदं अवन्संदा इव्सदि । [बुद्धिमती सम्प्राप्तं त्वया बुद्धिसाचिव्यपदम् । दैवबलेनपूर्णमनोरथो महाराजः पारितोषिक व्यपदेशेन आत्मनोऽपि पदमवश्यं दास्यति ।]

राजा - (सस्मितं) अनितरसुकरंकार्यनिर्वहण धुरन्धरायै बुद्धिमत्यै वितीर्णोऽपि स्वपदे किन्नःछिन्नम् ।

विदूषकः - (सरभसमुत्थाय, साञ्जलिबन्धं) संविहाण-बलेण सिद्धेकज्जेसच्चहरिच्चंददो ए महाराएण-विस्साणिदेसपदेतु एरा अत्तां विपत्तं होज्ज । तादाणिं एव्व तुमं अणुसरम्मुसोत्थिहोदीए । [संविधानबलेन सिद्धे कार्ये सत्यहरिश्चन्द्रतया महाराजेन विश्राणिते स्वपदे त्वया राजत्वमपि प्राप्तं भवेत् । तस्मादिदानीमेव त्वामनुसरामि स्वस्ति भवत्यै ।]

बुद्धिमती -(सस्मितमवनतमुखी तिष्ठति)

मणिशेखरः - देव ! नाद्यमनसरः परिहासस्य ।

राजा – विकटश्चाटूक्तिपटुः ।

विदूषकः – (ससंभ्रमं) महंतोविसओसमा पडिओ ।

[महान्विशयः समापतितः ।]

राजा – (विहस्य) कथमिव ?

विदूषकः – बुद्दिमदि ए सपदे पढिपदिदे तुह कहि ठाणंति ।

[बुद्धिमत्यै स्वपदे प्रतिपादिते तव कस्मिन स्थानमिति ।]

(क्षणं विचिन्त्य) विव्णादं [विषादं]

राजा – कस्मिन् ?

विदूषकः –कलावदी पदे [कलावती पदे]

राजा – (स्वगतं)

चिराभिलषितं स्थानं तदेतदतिदुर्लभम् ।
तर्हि सम्भाव्यते सर्वं यद्यदिष्टं प्रसीदति ॥

(विमृश्य, सात्मोपालम्भं)

उत्कण्ठामस्तकारूढा मम नूनमहो यतः ।
परिहासेन कथितं परमार्थे न गृह्यते ॥

[प्रकाशं]

[सर्वत्र निरङ्कुशं तव परिहसितम्]

मणिशेखरः – बुद्धिमती ! वयं त्वयि न्यस्तभराः, त्वं च चन्द्रिकायां, ततश्चन्द्रिका किमाह ।

बुद्धिमती – झत्ति णिउढेण महाराएण आअंतव्वंति ।
[झटिति निगूढेन महाराजेन आगन्तव्यमिति।]

विदूषकः – कहंति हुवणविदिओ महाराओ णिऊढं संचरिव्सदि ।
[कथं त्रिभुवनविदितो महाराजो निगूढं सञ्च-रिष्यति ।]

मणिशेखरः – वेषान्तरपरिग्रहो निगूढशब्दार्थः ।

विदूषकः –(ससम्भ्रम्भं) वअस समीईणो मंतिजणो संपदि ओ जं महाराअं सेलूसी कादुं इव्छइ ।
[वयस्य ! समीचीनो मन्त्रिजनः सम्पादितः, यन्महाराजं शैलूषी कर्तुं इच्छति ।]

मणिशेखरः –विकटसमयोचितानभिज्ञतया ब्रवीषि ।
अस्मन्नर्थे पूर्वैः क्षुण्णएवायं पन्थाः ।
पाञ्चालिकापरिणये पार्थाः पश्चापि विप्रतामभजन् ।
विजयेन भिक्षुतापि प्राप्तोद्वाहे सुभद्रायाः ॥

राजा – आस्तामेतत् ।
पुरैव पृथिवीपालाः सर्वेऽपि करदीकृताः ।
गमने कारणं चिन्त्यं यदौपयिकमद्य नः ॥
मितानुप्लवमाहोस्विद्गमनं मे ससैनिकम् ।
अस्थाने दूरतःपूर्वं परं सर्वभयावहम् ॥

विदूषकः – अव्भरहिददाए। बूविधवेसव्जेण अ अहं पढमं भणामि ।

[अभ्यर्हिततया बुद्धिवैशद्येन च अहं प्रथमं भणामि ।]

राजा – "युक्तियुक्तं वचो ग्राह्यं" इति हि नीतिः तथा यदि गृह्णीमः ।

विदूषकः– अदि सक्कविक्कमदाऽअणवेक्खि अंसाहि एक्केणव्वतु एवे एणतक्खसारिक्खंक्तुरअं आहि अतत्थगत्तूण चंदिआ णु महएरा अकण्ण अंधेत्तूण पडिणिवत्ति दव्वं अणंतरपाणिं-गहणमहूसवे अहंसोत्थिवाअणं लाहामि ।

[अतिशक्र विक्रमतया अनपेक्षित साह्यमेकेनैव त्वया वेगेन तार्क्ष्यसदृशं तुरगमारुह्य तत्र गत्वा चन्द्रिकाऽऽनुमत्या, राजकन्यकां गृहीत्वा प्रतिनिवर्तितव्यम् । अनन्तरं पाणिग्रहण-महोत्सवे अहं स्वस्तिवाचनं लभे।]

मणिशेखरः – औदरिकवैधेयपाटच्चरकृत्यमेतत् ।

विदूषकः – मणिसेहर अणहिण्णोसि पुव्वंदेव्ववदाहिदि पेसहिअ कण्णआहलणं किदंति महाभारदे सुणीअदि ।

[मणिशेखर ! अनभिज्ञोऽसि पूर्वं देवव्रतादिभिः, प्रसह्य कन्यकाहरणं कृतमिति महाभारते श्रूयते ।]

मणिशेखरः – तदुपायन्तरैः कार्यसिद्धौ ।

देवसेनः –

दुर्विदग्धतया सम्पत्समृद्ध्या चैकमत्यतः ।
त्रयाणामप्युपायानां गतिस्तत्र न विद्यते ॥

अतो विकटवचनस्यावकाशः । किन्तु युक्तं सबलगमनम् ।

विदूषकः – सक्कस्स किंसेणिएहिं । अहव आआरो ।

[शक्रस्य किं सैनिकैः अथवा आचारः ।]

राजा – आदावेव विरोधोद्भावनमनुचितम् ।

मणिशेखरः –

महता मन्यवस्त्वर्थमर्थितानैव शोभते ।
न कन्यार्थानुयोगस्तु निषिध्येत कदाचन ॥

विदूषकः – विदरणविहवेण अव्वि अकप्पया अवसि विकण्णप्पमुहस्समहाराअस्सकण्ण अणिमिन्तं विणुजुत्तं अब्भत्थणसमत्थणं ।

[वितरण विभवेनापि हितकल्पपादपशिबिकर्ण-प्रमुखस्य महाराजस्य कन्यकानिमित्तमपि न युक्त-मभ्यर्थन्समर्थनम् ।]

मणिशेखरः – योग्यतां परीक्ष्य कन्यकां देहीति प्रार्थये इति किमहं वदामि ।

विदूषकः – अण्णमुहेणपत्थणं विणकिंमहाराअपत्थणं ।

[अन्यमुखेन प्रार्थनमपि न किं महाराजप्रार्थनम् ।]

मणिशेखरः –प्रकारभेदोऽस्ति ।

राजा – एतावता स सैन्यगमने को हेतुः निर्धारितः ।

[प्रविश्य]

दौवारिकः – महाराज ! कश्चनमहातपस्वी भवद्दर्शनाभिलाषी द्वारि तिष्ठति ।

राजा – (ससम्भ्रमं) अविलम्बेन प्रवेशय ! ।

दौवारिकः – तथेति (निष्क्रम्य तापसेन सह प्रविश्य) महानुभाव ! इत इतः ।

राजा – (सपरिवारमासनादुत्थाय, पुरोऽवलोक्य)

त्वचातारक्षव्यापरिवृतकटिः शारदशशि-
प्रकाशं प्रत्यङ्गं सितभसितलेपं दधद्दयम् ।
जटाजूटस्फूर्त्या परिहसितविद्युद्गणरुचि-
र्महादेवस्साक्षादिव मम पुरो राजति मुनिः ॥

भो भोः पाद्यं पाद्यम् ।

तापसः – (समीपमुपसरति)

राजा – भगवन्नभिवादये ।

तापसः – अवितथमनोरथो भूयाः ।

राजा – तत्र भवान् आसनपरिगृहं करोतु ।

तापसः – (उपविशति)

राजा – (तदनुज्ञया परिजनेन सहोपविश्य) भवतामावासेन कर्दममाश्रमपदं पावनीक्रियते ।

तापसः –रत्नकूटाचले सर्वसिद्धिप्रदो नामास्माकमाश्रमः ।

राजा – तपोबलसम्पादितसर्वतीर्थसन्निधानतया स्वाश्रम एव वसतामत्रभवतामत्रागमने कियन्त्यहान्यतीतानि ।

तापसः – स्वाश्रम एव प्रातस्सङ्गवकृत्यं निवर्त्य तत्रैव गत्वा माध्याह्निकं करिष्यन् मनोगतेनाऽऽगतोऽस्मि ।

(सर्वे साश्चर्यमन्योन्यमवलोकयन्ति)

राजा – तपस्विषु किं नाम न सम्भाव्यते ।

पारावारचतुस्समुद्रपयसां पृश्निर्नभः प्राङ्गणे
विन्ध्यस्योत्पलपद्मबन्धुसरणे रोद्धुर्नियन्ता व्रती ।
वातापेरपि जाठरानलमुखे प्राणाहुतित्वप्रदो
नाधूनःशमितेल्वलः किल रुषा दान्तश्च कुम्भोद्भवः ॥

तापसः –

मम मात्रमियं विधा न बहूनपि वा परान् ।
देशाद्देशान्तरं नेतुं लोकाल्लोकान्तराण्यपि ॥

राजा – तातपादाः केन नाम्ना युष्मान् व्यवहरन्ति ?

तापसः – आजानसिद्धं मम त्रिकालविज्ञानं ततस्त्रिकालवेदीति मामाहुः ।

विदूषकः –(मुनिं प्रति) अव्अमाकुप्पसव्झसेण वा उलीहोद इमे हि .अअं ।

[आर्य ! मा कुप्य ! साध्वसेन व्याकुली भवति मे हृदयम् ।]

त्रिकालवेदी – न भेतव्यम् । निःशङ्कमभिधातव्यम् ।

विदूषकः – पुरा किल जोवि कोवि कावालिओ वेदाल-णिमित्तं सव्वहूमबलिं काढुकामो विक्कमक्क-मणुससारत्ति भुवणविदिअं ।

[पुरा किल योऽपि कोऽपि कापालिको वेताल-निमित्तं सार्वभौमबलिं कर्तुकामो विक्रमार्कमनु-ससारेति भुवनविदितम् ।]

त्रिकालवेदी – अथ किं? किं प्रकृते ।

विदूषकः – तुह्माणं आअमणे तण्णाअं मण्णंतेण मए णविण्णादं विण्णाणमाहप्पं ।

[युष्माकमागमने तन्यायं मन्यमानेन मया न विज्ञातं विज्ञानमाहात्म्यम् ।]

मणिशेखरः – धिग्वाचाट ! किं प्रलपसि ? रूपमेव महिमानं व्याख्याति (मुनिं प्रति) महानुभाव ! न श्राव्यमविवेकिवचनम् ।

त्रिकालवेदी – किं सूर्यस्य प्रतिसूर्यकहसनेन ?

विदूषकः –भुवणावणवइवण्णं कण्हं णंदणं हणोत्ति-जाणंतोजणो अइमाणुसचरित्तदं सणेणभ अवन्तोत्ति किण्ण विण्णादवंतो तह होदुत्तिमहहिअअं ।

[भुवनावनावतीर्णं कृष्णं नन्दजन्दन इति जानन् जनोऽतिमानुषचरित्रदर्शनेन भगवानिति किं न विज्ञातवान् , तथा भवत्विति मम हृदयम् ।]

मणिशेखरः - भवान्जानातु वा मा वा ? जानन्त एव जानन्ति । किं परीक्षया ?

राजा - (सभ्रूभङ्गं) आस्तामतिप्रसङ्गः ।(मुनिं प्रति) महानुभाव ! अपि नाम तपांसि वर्धन्ते ।

त्रिकालवेदी - (सवैमनस्यं)

कस्मिंश्चित्कुम्भिकुम्भस्थलगिरिदलनोद्धामदम्भोलिकेली
पाण्डित्योद्दण्डचञ्चत्खरतरनखरे कन्दरामन्दिरस्थे ।
शैलाटे तत्र धाटीं घटयति विकटे व्यात्तगम्भीरवक्त्रे
क्व स्थानं कुत्र जप्यं क्वनु हुतविधयः कुत्र वा नस्समाधिः॥

त्रिकालवेदी - राजन् ! भवन्तमन्तरेण पञ्चानन पञ्चतायां कः पारयति । एतद्व्याजीकृत्य सनाथीक्रियता-मस्मदाश्रमपदम् ।

राजा - तपोधनवर्य ! अवघ्निदेशकारिणो वयं भवता-मस्माकं च सङ्केतदेशमावेद्यगन्तव्यम् । अग्रे तत्र भवद्भिः ससैन्योऽहमनुपदमेवाऽऽगमिष्यामि ।

त्रिकालवेदी -

शरण्ये नःपुरारण्ये न्यग्वटे यमुनातटे ।
प्रतीक्षमाणस्त्वां वर्ते यावदागमनं तव ॥

(इति निष्क्रान्तः)

विदूषकः- (सव्यथं) जेणकेणविउवाएणपरिणअमंगल भविव्सदिव्ति परितोसं अणुव्वुहुसुणोमहदेव्व-पुआसमअरिकण्णाएण मिएंव्दकहासमापदिदा

[येन केनाप्युपायेन परिणयमङ्गलं भविष्यतीति परितोषमनुबभूवुषोर्महादेवपूजासमय ऋक्षन्यायेन मृगेन्द्रकथा समापतिता ।]

राजा –

अनुसृत्यापि मां भीतिरुदेति किमुते हरेः ।
ईदृशभूषोरगपतिः किं बिभेति गरुत्मतः ॥
दिष्ट्या समागतं तत्र युक्तं गमनकारणम् ।
अकिञ्चित्करमस्माकं सिंहबाधानिवर्तनम् ॥

ससैन्यगमनेऽपि तावदेवं व्यवस्थितिः । त्वय विकटेन बुद्धिमत्या च साकमस्माभिरग्र प्रयातव्यम् । तदनु दूत्यया निर्धारितसन्देशे देवसेनेन पश्चाश्चतुरङ्गिण्या सेनया ।

देवसेनः –(सविनयमुपसृत्य) देव ! दिल्लीपतेः क सन्देशः ?

राजा – (कर्णे एवमिव)

(नेपथ्ये)

(त्वरध्वं ! त्वरध्वं ! सिंहः समागतः, सर्वे समाकर्णयन्ति)

विदूषकः –(सोद्वेगमुत्थाय) हत्थियला अह पला अहद्दुन्ठमि अंदो समा अदो । अहं चंदसालं पविसि अदिदघटि अकवा ओचिव्ठिसं । व अव्सतुमंठणबुद्धिमदी एसमंमं अणुसरमणिसेहर-देव्वसेणव्पमुहाखव्गहव्थाणअरव्देरव्मिन्चिन्ठंतु-वेदणभुव्तिंदिलदेहायोहापारिंदपमहणाअ णीसरंदु ।

[हा धिक् ! धिक् ! पलायध्वम् । दुष्टमृगेन्द्रः समागतः । अहं चन्द्रशालां प्रविश्य दृढघटितकवाटं स्थास्यामि । वयस्य ! त्वं पुनःबुद्धिमत्या समं मां मानुसर मणिशेखरदेवसेनप्रमुखाः खड्गहस्तः-नगरद्धारे तिष्ठन्तु । वेतनभुक्तितुन्दिलदेहा योधाः पारीन्द्रप्रमथनाय निःसरन्तु ।]

मणिशेखरः – ममागमनसमये मध्येमार्गं प्रयाणनिर्धारितं सिंहलग्नं वक्तुमन्विष्यागच्छामीति वदन्मौहूर्तिको गतः । स एवाद्य व्याजहार सिंहलग्नमिति वक्तव्ये सिंह इति ।

[सर्वे विदूषकमवलोक्य हसन्ति]

विदूषकः – (दीर्घं निःश्वस्य, शिरःप्रमृज्य)

दाणिं षव्चअदजिविदोह्मि ।

[इदानीं प्रत्यागतजीवितोऽस्मि]

मणिशेखरः – किमित्यस्मानपहाय महाराजस्य स्वस्य बुद्धिमत्याश्च जीवितमभिलषितम् ।

विदूषकः – भाविणि ! परिणए वरोवअव्सो बुद्दिमद्दि संविहाणआरिणी अहं उण सोव्यिवाअणिओ । इदरेहिं किं ठिदेहिं किंघादेहिं ।
[भाविनी परिणये वरो वयस्यः बुद्धिमती-संविधानकारिणी, अहं पुनः स्वस्ति वाचनिकः । इतरैः किं स्थितैः किं गतैः]

राजा – मम बुद्धिमत्याश्च रक्षणमस्य भक्षणनिमित्तमेव ।

विदूषकाः – एदेउण मोव्खव्थं राअरव्खणं अहिलसंति ।
[एतेषु पुनः मोक्षार्थं राजरक्षणं अभिलषन्ति ।]

राजा – कः कोऽत्र भोः ।

[प्रविश्य]

दौवारिकः – आज्ञापयतु देवः ।

राजा – कञ्चुकिनमाह्वय !

दौवारिकः – तथा इति । [निष्क्रान्तः]

[ततः प्रविशति कञ्चुकी]

कञ्चुकी –

निर्याता यातलोकानुसरणचणताजीवभाजां नवीन-
प्रत्यक्षे जायमाने भयजनकमहोद्धामसङ्घोषणानाम् ।
स्थापत्यानां चरित्रं सममिदमखिलं नः प्रतीहारवेदी-
धूलीपालीकराली कृतनिजवपुषामावसानं शुनां च ॥

(सखेदं)

नरपतिहितकार्याऽऽवेशसंमोहितान्तः-
करणपरिणतीनामायुरस्मद्विधानाम् ।
अतिचिरमविशद्यः पातकी पद्मयोनिः
किमिति भुवि वदेयं दुःखतन्त्रत्वमस्य ॥

(समीपमुपसृत्य) विजयतां देवः ।

राजा – क्षेमङ्करः ! मद्वचनादुच्यतां देवसेन सूनुरिन्द्रसेनः। यमुनावनविहारिसिंहसंहाराय प्रस्थानमुद्घोष्य स्वसुतेन वीरसेनेन साकं चतुरङ्गिणीं सेनामभिनिर्माप्य मौलबलपरिवृतः पुरं परिपालयेति ।

कञ्चुकी – यदाज्ञापयति देवः ।

[इति निष्क्रान्तः]

[नेपथ्ये]

वैतालिकौ – सुखाय माध्यन्दिनी सन्ध्या भवतु देवस्य ।

एकः –

तीरप्रान्तरुहावनीरुहमहाशाखाशिखापल्लव-
व्रातप्रावृतदीर्घिकशशिशिला संक्लृप्तसोपानके ।
उद्याने विजने निषेव्य मिथुनं शैत्योपचारक्रियां
क्रीडाभिर्विविधाभिरेव कुरुते मध्याह्नकालक्षिपाम् ॥

अन्यः –

घर्मातिरेकजनितश्रमवारिसिक्त-
सव्याजपल्लवतया परिशीतलानि ।
आलिङ्ग्य सम्प्रतिवधूकुचमण्डलानि
तापोपशान्तिमुपयान्तितरां युवानः ॥

अपि च –

दिवसकरतापयोगाद्भीतं भीतं शनैः शनैः शीतम् ।
शय्यागृहेषु राज्ञां द्विगुणितविभवं निलीय किं वसति ॥

चन्द्रकान्तमणिचन्द्रशालिका
सान्द्रशीतलविटङ्कचारिणः ।
कामिनीभणितिमात्मकूजितै –
र्गर्हयन्ति हि कपोतपोतकाः ॥

राजा –

शस्त्रास्त्रव्रजदुर्निवारविभवस्वैरप्रचारोद्धत –
स्वस्पर्धोक्तपुरत्रयीवनदवीभूताकिकाक्षिद्युतिः ।
व्यालव्याघ्रमृगेन्द्रपर्वतनदी वन्या शिलादुर्गमे
मार्गे मार्गसहाय एव भगवान् पायादुमावल्लभः ॥

[इति निष्क्रान्तास्सर्वे]

॥ प्रथमोङ्कः समाप्तः ॥

॥ द्वितीयोऽङ्कः ॥

[ततः प्रविशति चेटी]

चेटी – आणतह्मि चंदिआ ए । अज्जगोरीपु अणत्थं आअच्छइभट्टिदारी आततुमंतिरिदपदंगदुअपु ओवअरणाइसंपादेहि त्ति ।
[आज्ञप्तास्मि चन्द्रिकया अद्य गौरीपूजनार्थं आगच्छति भर्तृदारिका । तस्मात्त्वं त्वरितपदं गत्वा पूजोपकरणानि संपादयेति ।]

[इति परिक्रामति]

[ततः प्रविशत्यपरा चेटी]

प्रथमा – (द्वितीयं दृष्ट्वा) कलगीदिए कुदोदे धावणं ।
[कलगीतिके कुतस्ते धावनम् ।]

द्वितीया – (प्रथमां दृष्ट्वा) अणुरंजिएदाणिं विएत्थव एवव्वट्टसि । आ अदेव्वभट्टदारि आ ।
[अनुरञ्जिके! इदानीमप्यत्रैव वर्तसे ? आगतैव भर्तृदारिका ।]

अनुरञ्जिका – अहं विगजवदी होनमि किं एदेण अत्थि किं विविण्णादव्वं । भट्टिदारि आएआअमणं किं गोरि संपव्जाएउद अत्थि किं कन्जंदरं ।
[अहमपि गतवत्यस्मि किमेतेन अस्ति किमपि विज्ञातव्यम् । भर्तृदारिकया आगमनं किं गौरी सपर्यायै ? उतास्ति किं कार्यान्तरम् ?]

कलगीतिका –किं ण आणासि रहसं ।
[किं न जानासि रहस्यम् ?]

अनुरञ्जिका – जाणामि भट्टिदारिआ सिविणदं सणं आरहि
अचित्तवडदाणपुव्वंवुद्धिमदी पेसणपेरंत्तं ।
[जानामि भर्तृदारिकास्वप्नदर्शनमारभ्य चित्रपट-
दानपूर्वं बुद्धिमतीप्रेषणपर्यन्तम् ।]

कलगीतिका – तदो वरं अदिगोवणिज्जं ।
[ततः परमतिगेपनीयम् ।]

अनुरञ्जिका – किं महविगोवणिज्जंभणविस्सद्धं ।
[किं ममापि गोपनीयम् भण ! विस्रब्धम् ।]

कलगीतिका – भट्टिदारिआ एनं दअमहाराअ स अपव्व-
परदंसणं हो दुत्ति एदंणिबंधणं आअमणं ।
[भर्तृदारिकाया नन्दकमहाराजस्य च परस्परदर्शन
भवत्विति एतन्निबन्धनमागमनम् ।]

अनुरञ्जिका – ज इतस्सकण्णआहिलासोतदा अभत्थणेण
होदव्वां । किं इमिणगूढ वावारेण ।
[यदि तस्य कन्यकाभिलाषस्तदा अभ्यर्थनेन
भवितव्यम् । किमनेन गूढव्यापारेण ।]

कलगीतिका – सव्यंसोबाहिरवा वारो एसो तं स हेदु
भूदो अंतरंग वा वारो । अव्वं अचंदि आबुद्धि-
मदीव अणेण इदरेदरचित्तवडविलोअणेण अजाद-
पेम्मादि स आणंविअव्णोव्णदं सणं अवेव्खं ताण
ताणं एक्कंदसमालो अणेण मणोणिव्वुदं होइ ।
[सत्यं स बाह्यव्यापारः । एष तस्य हेतु
भूतोन्तरङ्गव्यापारः। अन्यच्च चन्द्रिकाबुद्धिमती
वचनेन इतरेतरचित्रपटविलोकनेन च जात-

प्रेमातिशयोरपि अन्योन्यदर्शनमपेक्षमाणयोः तयोरेकान्तसमालोकनेन मनो निर्वृतं भवति ।]

अनुरञ्जिका - कव्वणअत्थिणो पत्थणंएव्व सव्वसंमदं णेणणकिं कज्जसिद्धी ।
[कन्यकार्थिनः प्रार्थनमेव सर्वसम्मतम् । अनेन किं कार्यसिद्धिः ।]

कलगीतिका - तंवि चलइ । [तदपि चलति ।]

अनुरञ्जिका -दविट्ठस्स तस्सकहं पउत्ती होदव्वं ।
[दविष्टस्य तस्य कथं प्रवृत्या भवितव्यम् ।]

कलगीतिका - जदा बुद्धिमदी पहिदा तदा पहदि गूढआरिणी हिं चे डीहिं पडिरवणं उत्तंतो समाणिज्जइ ।
[यदा बुद्धिमती प्रहिता तदाप्रभृति गूढचारिणी-भिश्चेटीभिः प्रतिक्षणं वृत्तान्तः समानीयते ।]

अनुरञ्जिका - अज्जउण कहिंसो समाअदो ।
[अद्य पुनः कस्मिन्स समागतः ।]

कलगीतिका -गोरिघरस्स पेरं ते संकेदिए बाल-सहआरवणे परिमिदजणपरिवुदोसमाअदोत्ति सुदं चंदिआए तदोइ अं दुरा ।
[गौरी गृहस्य पर्यन्ते सङ्केतिते बालसहकारवने परिमितजनपरिवृतः समागतेति श्रुतंचन्द्रिकया तत इयं त्वरा ।]

अनुरञ्जिका – स अलज्जणगदागद्भजोव्गेइ मसिं पदेसे तारिसो कहं अणवेक्खिदो णिवसदु ।
[सकलजनगतागतयोग्ये अस्मिन्प्रदेशे तादृशः कथमनवेक्षितो निवसतु ।]

कलगीतिका – भट्टिणीए वअणेण भट्टिणाहिओ एव्वणरमेत्तसंचारो णिवन्तिदो ।
[भगिन्यावचनेन भर्त्राह्यपि नरमात्रसञ्चारो-निवर्तितः ।]

अनुरञ्जिका – एदव्सिंकव्जे किं भट्टिणीवि अणुव्पविव्ठा ।
[एतस्मिन्कार्ये किं भगिन्याप्यनुप्राविष्टा ।]

कलगीतिका – अह इं [अथ किम् ?]

[नेपथ्ये कलकलः]

[उभे आकर्णयतः]

अनुरञ्जिका –कुब्जवामनवरिसवराणंहलहलबोलो सुणी अदि । अदो घरादोणिव्गदा भट्टिदारिएत्ति तव्केमि । तुमं झत्ति अव्चणासामग्गिं सव्जीकदुअ पडिणि वव्टे हि अहं उणचंदि आए अणुअरी होम्मिति ।
[कुब्जवामनवर्षवराणां हलहलाशब्दः श्रूयते । अतो गृहान्निर्गता भर्तृदारिकेति तर्कयामि । त्वं जटिति अर्चनासामग्रींसज्जीकृत्य प्रति निवर्तस्व । अहं पुनश्चन्द्रिकाया अनुचरा भवामि इति ।]

[निष्क्रान्ते]

[प्रवेशकः]

[ततः प्रविशति राजा मणिशेखरो विदूषको बुद्धिमती च]

मणिशेखरः - अहो ! रामणीयकं केलीवनस्य ।

समुन्मीलत्पुष्पस्तबकनिकरानम्रशिरसां-
पटीरक्षोणीभृत्यवनलुलितैःपांसुपटलैः ।
कृतावालःश्रेणीसरणिषु तलेषु क्षितिरुहा-
मियं मन्दं मन्दं प्रवहति मनोज्ञा मधुझरी ॥

(साश्चर्यं)

वनलक्ष्मी विहाराय वल्लीभिरिव सज्जिताः ।
शय्या विभान्ति परितःकीर्णाः कुसुमराजयः ॥

राजा - (पुरतो निरूप्य)

पीत्वा गलं मधुरसं मञ्जरीणां पुनः पुनः ।
परिभ्रमन्ति शनकैः पादपेषु मधुव्रताः ॥

(अन्यतो दृष्ट्वा)

"शिखावलवधूरेषा रुचिरं चन्द्रकाङ्कितम्" ॥
विस्रस्य पिंच्छं पुरतःकान्तस्य परिनृत्यति ॥

विदूषकः - ही ही

मल्ली वेल्ली कुव्पलग्गेषु मंदं
लग्गं गाणं छव्पआणं समूहो ।
गोहूमाणं गोलगोलं किदाणं
संकंसंचं मोदआणंकरेइ ॥

[मल्ली वल्ली कुड्मलाग्रेषु मन्दं
लग्नाङ्गानां षट्पदानां समूहः ।
गोधूमानां गौलगोलाङ्कितानां
शङ्कां सत्यं मोदकानां करोति ॥]

राजा – (परिवृत्य,सहर्षं) अये ! नयनसाफल्यं सञ्जात-
मस्माकम् ।

शैवालजालकबरी शफरी दृगेषा
योषामणीव कलसिञ्चित हंसकाढ्या ।
डिण्डीर खण्डनवचन्दनपङ्कचर्चा
संदृश्यतेऽत्र सरसी सरसीरुहाढ्या ॥

(अन्यतोऽवलोक्य)

एला लता विततमञ्जुलवञ्जुलाग्रा
शाखा कुडुङ्गचरपत्रिकुडुम्बिनीनाम् ।
निद्राति बृन्दमरविन्दमरन्दपान-
माद्यन्मधुव्रतरुतं कलयद्रता ते ॥

मणिशेखरः – राजन् ! इतो दीयतां दृष्टिः ।

कासारलक्ष्मीर्भवदर्हणायै-
विशालपङ्केरुहपत्रनाभिः ।
निधाय गारुत्मतरत्नपात्रे !
प्रतीक्षतेऽम्भःकणमौक्तिकानि ॥

किञ्च –

चूताङ्कुरग्रसनभूरिकषायकण्ठः-
पुंस्कोकिलाश्चपलचञ्चुविपञ्चिकोत्थैः ।
गायन्ति पञ्चमरवैबिरुदावलिं ते
सौन्दर्यनिर्जितमणीचकसायकस्य ॥

राजा – (सस्पृहं)

सुधासूतिज्योतिःप्रतिभटमुखेन्दुद्युतिझरी
सुधाधारापानप्रशमितचकोरीघनतृषा ।

मृषा गौरीसेवाकलनमपदिश्य प्रियतमा .
चिरादक्षणोर्जाड्यं किमु मम च यावच्छमयति ॥

राजा – बुद्धिमति ! कुत्र सङ्केतप्रदेशः ?

बुद्धिमती –

आभूमीदलविलम्बिसाहो अइउंतलदासंवलणणीरंधो ।
पव्लविदोकुसुमिदोअ एसो बालंबरुखो पुरदोचिव्ठइ ॥

इमव्सएव्व मूलालवालदले णिउढे हिंअहने हिं ठादव्वं । इदो पुरदो एव्वचंदणलदावेव्ठि अचं पअपा अवमूलफलिहमणिवेदि आ अंताणं आ अमणं ।

[आभूमीतलविलम्बि शाखःअतिमुक्तलता संवलननीरन्ध्रः ।
पल्लवितः कुसुमितश्च एषो बालाम्रवृक्षः पुरतस्तिष्ठति ॥

अस्यैव मूलालवालतले निगूढैरस्माभिः स्थातव्यम् । इतः पुरतः एवं चन्दनलतावेष्टितचम्पकपादप-मूलस्फटिकमणि वेदिकायां तयोरागमनम् ।]

राजा – (विलोक्य) सुकरमनितरवीक्षणमस्माकं पर-निरीक्षणम् ।

[सर्वे तद्बुपसृत्य, शाखामुदस्य प्रवेशं नाटयन्ति]

[नेपथ्ये कलकलः]

राजा –

अव्यक्तोऽपि कुतस्त्यःशब्दस्तद्दृष्टिकांक्षिणो मेऽद्य ।
श्रुतियुगमाप्यायतिध्वनिरिव मेघस्य वृष्टिकामस्य ॥

(विमृश्य, सवितर्कं)

उन्निद्रपङ्कजमरन्दरसावलेह-
मत्ताद्विरेफनिकुरम्बकझंक्रिया वा ।
माकन्दबृन्दकलकोकिलकूजितं वा
प्रोज्जृम्भते सरलहंसवधूरुतं वा ॥

[पुनर्नेपथ्ये]

हला चंदिए कहिं उणपदेसे यअरत्धअ णमक्स
वि हि आ ।
[सखि ! चन्द्रिके ! कस्मिन्पुनःप्रदेशे मकरध्वज-
नमस्या विधेया । *आकृतिर्न दृश्यते ।]

राजा –

वाग्देवीकरपल्लवोल्लसमणीवीणागुणास्फालन-
प्रक्वाणादरणीयभूरिमहिमाकीरीवचःसोदरी ।
कर्णानन्दविधायिनी सुकृतिनां कस्याश्चिदेणीदृशो
वाणी कापि विजृम्भते मधुकरश्रेणीरवोत्सारिणी ।

विदूषकः – कदि कदि ण संदि उव्जाणचारिणीओ रमणीओ
[कति कति न सन्ति, उद्यानचारिण्यो रमण्यः ।

राजा –

दिष्ट्या यं यदि निस्वनः परिणतस्तन्नूपुरस्य ध्वनिः-
सल्लापश्च तदाननाब्जगलितः सैषाकृतिस्तद्वपुः ।
अङ्कूरः प्रथमं ततः किसलयं पश्चात्प्रसूनं भवे-
दाशाया मम वीरुदः फलमथो दृश्येत भुज्येत च ॥

बुद्धिमती – अव्णहणसमव्थणिव्जं । अअंएव्व संकेदकालो
[अन्यथा न समर्थनीयम् । अयमेव सङ्केतकालः ।]

---

* वाक्यमिदं मूले नास्ति ।

विदूषकः – तइ जइ [तथा यदि] (संस्कृतमाश्रित्य)

दिष्ट्या सेत्स्यति मङ्गले परिणये द्रष्टव्यसन्दर्शना-
द्वीणावेणुमृदुध्वनिश्रवणतः पीताम्बराच्छादनात् ।
आघ्राणेन सुगन्धिनां बहुविधापूपान्नसम्भक्षणा-
त्सौहित्यं निरवद्यमेव भविता सर्वेन्द्रियाणामपि ॥

राजा –प्रधानसन्देशे कथं लाभलोभः ।

मणिशेखरः –क्षणं जोषमास्यतामग्रे स्पष्टीभविष्यति ।

विदूषकः – (पुरोवलोक्य सभयं) व अव्स ! तुमं राएव्ति चिठसि एव्कावि पडकुडीणाणीदामुव्धबुव्धिणा मएवि छन्तं णाणीदं जलदसमओ समापडिओ । [वयस्य ! त्वं राजान्तिकस्तिष्ठसि एकापि पटकुटीनानीतामुग्धबुद्धिना मयापि छत्रं नानीतम् । जलदसमयः समापतितः ।]

राजा – (विहस्य) अहो ! भ्रमः । वसन्तऋतौ का कथा वर्षाणाम् ?

विदूषकः –

सिणिव्धगंभीर सणं विणीलं फुरंतपेरंतपढुंत वारि ।
हिरव्णवव्णुव्जलविव्जुलेहा गव्भं महव्भं धुरिभाइ येव्ख ॥

[स्निग्धगम्भीरस्वनंविनीलं स्फुरन्ति पर्यन्ति पतन्ति वारि ।
हिरण्यवर्णोज्वलविद्युलेखा गर्भं महाभ्रं धुरिभाति पश्य ॥]

राजा – (चिरं निध्याय) सखे ! पश्य !

धाराधरो नैषतमालषण्डं-
न गर्जितं नूपुरघोष एषः ।
न वर्षमेतन्मकरन्दधारा
न विद्युदेषा वनितोज्वलाङ्गी ॥

विदूषकः - इत्थि आकामुअव्स सा एव्व सव्वदो स्फुरइ ।
[स्त्रीकामुकस्य सैव सर्वतः स्फुरति ।]

(पुनर्विलोक्य) हा हदोस्मि तुह वअव्स भावेण । रवणदा समाअदा आहार वत्तावि णव्यउव्ता विवणि सेदिणी विअ उदरव्मन्दरं दव्जइ ।

[हा हतोऽस्मि तव वयस्यभावेन । क्षणदा समागता आहारवार्तापि न प्रवृत्ता । विपणि स्वेदिनीव उदराभ्यन्तरं दहति ।]

राजा - अतीव भ्रान्तोऽसि ।
तपने तपति स्वैरं मुधा खलु तमी कथा ।
प्रातर्मुक्तवतो मृष्टं क्षुधा बाधा च सङ्गवे ॥

विदूषकः - अहं किंवि णआणे पुरदो पेव्ख । चंदोकलाघणदोणिव्गव्छइकोमुदिं पुरोकदुआ ।

[अहं किमपि न जाने पुरतः पश्य ! चान्द्रीकलाघनान्निर्गच्छति कौमुदीं पुरस्कृत्य ।]

राजा - (सम्यगवलोक्य, सपरितोषं), सखे ! पश्य !
कान्ता तमालजालान्निस्सरति सखीं पुरोधाय ॥

विदूषकः – (विलोक्य, सशिरःकम्पं) व अव्समहवि अतुहवि अत्थि किंचिपव्णाबलं । एसा सव्वं इत्थि आएव्वतहविकांतेव्ति वुव्धिव्पमादो मा होदु । जदो इदंठाणे गौरी सदवं पमदवणं अतदो ।

गौरी वा वणदेवी वा जाविकाविसुरी इअं ।
माणुसीसु कहं होव्ज परहाईरिसि ५९ ॥

[वयस्य ममेतावतापि अस्ति किंचित् प्रज्ञाबलम् । एषा सत्यं स्त्रयेव । तथापि कान्तेति बुद्धिप्रमादो मा भवतु । यत इदं स्थानं गौरी सदनं प्रमदवनं च ततः –

"गौरी वा वनदेवी वा यापि कापि सुरी इयम् ।"
मानुषीषु कथं भवेत्परह्येतादृशी प्रभा ॥]

राजा –

"तारुण्यपूर्णं लावण्यमिदमत्रैव नान्यतः" ।
इत्यनेनानुमानेन सैवेयमिति निश्चयः ॥

[ततः प्रविशति कलावती चन्द्रिका च]

कलावती – हला ! चंदिए कहिं उण पदेसे मअरव्धअ णमव्सा विहेआ ।
[सखि ! चन्द्रिके ! कस्मिन्पुनःप्रदेशे मकरध्वज नमस्या विधेया ।]

चन्द्रिका – एव्थ एव्व चंपअरुव्ख विअव्डिआ अं ।
[अत्रैव चम्पकवृक्षवितर्दिकायां ।]

[उभे प्रवेशं नाटयतः]

चन्द्रिका –

मव्झेचंपअसाहिचंदणलदासाहंदरेणिव्गदा
मूलावालदव्लुव्थिदाकुसुमिदाउन्धंदरंसोहइ ।
अव्भव्णं धुरि पाविदा सहसिदामुव्धानवोढाबहू
वाहाहिं सहिपेव्खपेव्खपइणोगाढावगूढाविअ ॥

[मध्ये चम्पकशाखिचन्दनलता शाखान्तरे निर्गता
मूलावालतलोत्थिता कुसुमितोर्ध्वं दरं शोभते ।
अभ्यर्ण धुरिप्रापिता सहसिता मुग्धा नवोढा वधू-
र्बाहुभ्यां सखि ! पश्य ! पश्य ! पत्यु(?)र्गाढोपगूढाविव ॥]

कलावती – (स्वगतं) एदाए लदाए विअ ईरिसं सोहव्गं मव्झवि किं भविव्सदि ।
[एतस्या लताया इव ईदृशं सौभाग्यं ममापि किं भविष्यति ।]

(इति चिरं पश्यन्ती स्थिता)

राजा –

उपमा द्रव्यविमर्शे न किञ्चिदपि सदृशमेतदङ्गानाम् ।
मानससृष्टिःस्रष्टुःकिं तत्किमु काममायैषा ॥

कलावती – चंदिएं अव्ज सविसेसं मइ तुह पसादो संजादो जंतुए कंखिआमणरहपुरिअंदरं संविहाणंदरं कीर इव्ति वाहरिदं ।
[चन्द्रिके ! अद्य सविशेषं मयि तव प्रसादः सञ्जातः । यत्त्वया काङ्क्षितमनोरथपूरितान्तरं संविधानान्तरं क्रियतं इति व्याहृतम् ।]

राजा –अन्यार्था इवायमनयोरारम्भः ।

विदूषकः – महवि तह परिभाश । [ममापि तथा प्रतिभाति ।]

मणिशेखरः – अस्मिन्पक्ष एव संविधानान्तरम् ।

बुद्धिमती – को संसओ [कः संशयः]

चन्द्रिका – कीर इव्वि किं भव्णइ किदं एव्वेति वत्तवं ।
[क्रियत इति किं भण्यते, कृतमित्येव वक्तव्यम् ।]

राजा –

सन्दिग्धं चन्द्रिकया विशदीक्रियत इति युक्तमेव तया ।
सन्देहपदमिव पदं प्राप्तं प्रकृते तदेव पदभावम् ॥

विदूषकः – कहं अव्णहाकिदं वट्टमाणे भूदपसंजणं ।
[कथं अन्यथाकृतं वर्तमाने भूतप्रसञ्जनम् ।]

मणिशेखरः –कृतमेवेति प्रकृतेस्संविधानान्तरस्य
सिद्ध–प्रायताकथनम् ।

बुद्धिमती – एव्वं खु विव्णादव्वं
[एवं खलु विज्ञातव्यम्]

कलावती – किं पुव्वस्सआसाविअएदस्सवि ।
[किं पूर्वस्याशेवैतस्यापि।]

चन्द्रिका – पुवासा मिअतिह्णा जलमणीसा एसा उण–
– पच्चक्खामिअ सेवा ।

[पूर्वाशा मृगतृष्णा जलमनीषा एषा पुनः प्रत्यक्षा-मृतसेवा ।]

राजा–

मृगतृष्णा मयि तृष्णा कथं नु जाता बतैकपदे ।
प्रत्यक्षामृतसेवा परत्र द्विग्युवति चापल्यम् ॥

विदूषकः – इत्ति आजाणमेत्तं ण विस्सासपत्तं तत्थवि अणिअदमणो तरुणीजणो ।

[स्त्री जनमात्रं न विश्वासपात्रं, तत्राप्यनियत-मनास्तरुणीजनः ।]

मणिशेखरः –चिरन्तनाशेति चित्रपटदर्शनं नूतनाशेति प्रत्यक्षदृष्टिः ।

बुद्धिमती – एदाणं अक्खरणक्स तुह वअणं वंखाणं । [एतयोराख्यानस्य तव वचनं व्याख्यानम् ।]

कलावती – इदं कदाआरद्धं । [इदं कदाऽऽरब्धम् ।]

चन्द्रिका – जदा बुद्धिमदी पेसिदा ।
[यदा बुद्धिमती प्रेषिता ।]

राजा – इयं तदङ्गीकृत्य तदारम्भसमयं पृच्छति । एषा पुनस्तदारभ्य कालविप्रकर्षो जात इति वदति । साधु ! साधु !

विदूषकः – एव्वं अव्वदव्ठिदचिव्ताणं वावारो दुरावारो ।

[एवं अव्यवस्थितचित्तानां व्यापारो दुराचारः ।]

मणिशेखरः - प्रेमातिशयेन तज्जिज्ञासया स्वेच्छा खल्वेतत्पृच्छ । एतदारम्भः बुद्धिमती प्रेषणानन्तरमेव ।

बुद्धिमती - दिठ्ठिए पकडिदपकिद्धकज्जसिद्धीतुह बुद्धी । [दिष्टया प्रकटित प्रकृतकार्यसिद्धिस्तवबुद्धिः ।]

कलावती - किं एव्वं मन्दभाइणीए मह सुलहं । [किमेवं मन्दभागिन्या मम सुलभम् ।]

चन्द्रिका -किं तुहवि दूलहं । [किं तवापि दुर्लभम् ।]

राजा -

सौन्दर्येण परस्य साम्प्रतमसौ दौर्लभ्यमाशङ्कते
सौलभ्यं ननु चन्द्रिका निजसखीलावण्यतः शंसति ।
अन्यस्मिन्नपि चेन्मयीव विफले तत्रैव चेद्दन्यतः-
स्तन्यायादनवस्थया निरुपमं रूपं भवेन्निष्फलम् ॥

विदूषकः - एव्वं चावलाणरूपवेहल्लं हिअअ सल्लं । [एवं चापलानां रूपवैफल्यं हृदयशल्यम् ।]

मणिशेखरः- चित्रपटदर्शनस्य तावति प्रयतने निर्विवादः। प्रत्यक्षदर्शनरूपसंविधानान्तरस्य दौर्लभ्यवादः । भवदागमननिश्चयेन चन्द्रिका सौलभ्यभाषा न मृषा ।

बुद्धिमती - एआरिस दूसंकाहलणकल्लो तुमंवुहव्पइतुल्लो ।

[एतादृशदुश्शङ्काहरणकल्पस्त्वं बृहस्पतितुल्यः ।]

कलावती – तारिसो को मइ विससो ।
[तादृशः को मयि विशेषः]

चन्द्रिका –रूवविसेसो । [रूप विशेषः ।]

राजा – अत्र कः सन्देहः ?

विदूषकः – अदोखु अविआरिदसंगदीतुहअआदी ।
[अतः खलु अविचारित सङ्गतिस्तवागतिः ।]

मणिशेखरः – अमान एष उभयोरपि समानः ।

बुद्धिमती – अदो एव्व परप्पर दिदिक्खा सरिक्खा ।
[अत एव परस्पर दिदृक्षा सदृक्षा ।]

कलावती – एसो ण तव्स सरिसो ।
[एषो न तस्य सदृशः ।]

राजा – तस्य रूपातिशयः क्रिमुच्यते, एनमतिरिच्यते ।

विदूषकः – अदो सेतव्सिंईरिसो अहिणिवेसो ।
[अतो स्यास्तस्मिन्नीदृशोऽभिनिवेशः ।]

मणिशेखरः – भवद्रूपस्य स्वं रूपमसदृशमिति चित्र-
पटदानं बुद्धिमतीचन्द्रिकानिर्बन्धनिदानम् ।

बुद्धिमती – दिव्ठिएसंसआअंमएवाहरिदं वअणामिदं न
विसुमरिदं ।

[दिष्टचा संसदि मया व्याहृतं वचनमिदं . न विस्मृतम् ।]

चन्द्रिका – अव्पणो रुवाणहिव्णो एदंदव्ठण सोउण वा ण लगइ को वा जुवा ।

[आत्मनो रूपानभिज्ञे एनं दृष्ट्वा श्रुत्वा वा न लगति को वा युवा ।]

राजा – सत्यमाह चन्द्रिका । एतस्य द्रष्टा श्रोता को वा नायाति ।

शङ्कायामेतस्यां जिगमिषु हृदयं ममाद्यैव ।
येनाकृष्टमनीशं भूयोभूयः परिभ्रमति ॥

राजा – (बुद्धिमतीं प्रति)

त्वयाकृष्टेन नगरात्क्वचन स्थापितेन च ।
मयैतावदिह प्राप्तं किमितः प्राप्स्यते परम् ॥
नजाने नापि विकटो न चापि मणिशेखरः ।
त्वदुपज्ञमिदं कार्यं श्रोतव्यं किं श्रुतं त्वया ॥

अथवा त्वयि मयि चन्द्रिकायाश्च को दोषः ।

कर्तव्यं विनिवेशितं त्वयि मया तच्चन्द्रिकायां त्वया
सख्यां स्वस्य तयेयमेवमभवद्दूतश्च सम्प्रेषितः ।
तुष्टे दानकथादसीयजनके रुष्टे तु संयत्कथा-
तत्रोऽप्येवहठाहृतिः परिहृतिः पक्षे द्वयेऽपीष्यते ॥

ततश्च –

परानुरक्तचित्तेति मया परिचितेति च ।
अन्यैर्हा ! हन्त ! सन्त्यक्ता सत्यमम्बा भविष्यति ॥

राजा – (विचिन्त्य, सात्मोपालम्भं)

तारल्यं तरुणीजनस्य सहजं सेयं नृपालात्मजा
स्वप्ने दृष्टिरदृष्टयासकृदपि व्यक्तीकृता सा स्त्रिया ।
तद्वार्ताहर एष मे परिजनो मन्मौग्ध्यमाः किं ब्रुवे
प्रत्येतव्यममीषु नैकमपि मे धिङ्मान्मथं चेष्टितम् ॥

कृतमनेन संविधानेनेत्युत्तिष्ठति ।

मणिशेखरः – (सप्रश्रयं) देव ! न काप्यन्यशङ्का । चन्द्रिका बुद्धिमत्योर्मतमन्यथा न भविष्यति । क्षणमात्रमुपविश्यताम् ।

बुद्धिमती – चुलु असलिलेमज्जणं उम्मज्जणं अकीरइर वणं मरिसिदव्वं चंदि आ सण्णं करिस्सइ ।
[चुलुकसलिले मज्जनमुन्मज्जनं च क्रियते । क्षणमर्पितव्यम् । चन्द्रिका संज्ञां करिष्यति ।]

राजा – युवयोर्वचनानुरोधेन मुहूर्तमात्रमवलोक्यामः । (इत्युपविशति)

कलावती – चंदिए चित्तवडं उवणेहि खणमेत्तंउक्कंठाविणोदणं करोमि ।
[चन्द्रिके चित्रपटमुपनय । क्षणमुत्कंठाविनोदनं करोमि ।]

मणिशेखरः –चित्रपटकथा .प्रस्तूयते ।

राजा – तत्राप्युदेति परकीयत्वशङ्काकलङ्काङ्कुरः ।

चन्द्रिका – (चित्रपटं चम्पकतरुमूले समासं जयति)

मणिशेखरः – (आकृतिर्विभावनीया)

राजा – विप्रकर्षाद्विशेषो न गृह्यते ।

कलावती – (चित्रपटं विलोक्य) सहिइत्तिअं कालं तव्स महाभाअंस नामहे अं अवणत्थंति भमिदं जदो दाणिं विपचणखदं सणेण णणंदेइ ।
[सखि ! इयन्तं कालं तस्य महाभागस्य नामधेय-मन्वर्थमिति भ्रमितम् । यतः इदानीमपि प्रत्यक्ष दर्शनेन न नन्दयति ।]

मणिशेखरः - भवदभिधानस्य यथार्थतामियमप्यन्धयति ।

राजा – हन्त ! तवापि भ्रमः ।

चन्द्रिका – तं चिव्ठदु चिव्तवइलिहिदो केरिसो ।
[तत्तिष्ठतु ! चित्रपटलिखितः कीदृशः ।]

कलावती – एसो नंदओ एव्व जव्स विलोअणं हिअअं णंदेइ ।
[एष नन्दक एव यस्य विलोकनं हृदयं नन्दयति ।]

मणिशेखरः – (सरभसमुत्थाय, साञ्जलिबन्धं) संप्रति प्रसीद ।

राजा – समनः प्रसादं चिरमपदे शङ्कितवानस्मि ।
(बुद्धिमतीं प्रति) अधुना त्वर्थतोऽपि बुद्धिमत्यसि ।
(मणिशेखरमवलोक्य) साम्प्रतं भवान्मन्त्रिशेखरः ।

विदूषकः – (साभ्यसूयं) तुम्हे केवलं जहत्थणामहेआ किं अहं एक्को अणत्थाहिहाणो ।
[यूयं केवलं यतार्थनामधेयाः किमहमेकोऽनन्वर्थाभिधानः]

मणिशेखरः – (सपरिहासं) विकट ! त्वयारव्यैव सार्थक नामतां व्याख्याति ।

चन्द्रिका – हला कलावदि कुसुउमोहसपज्जाकिदे सहत्थेहिं पसूणाइ समाहरिदंवाइ ।
[सखि ! कलावति ! कुसुमायुधसपर्याकृते-स्वहस्ताभ्यां प्रसूनानि समाहर्तव्यानि ।]

कलावती – तहत्ति [तथेति] । (पुष्पाण्यपचिनोति)

राजा – (स्वगतं)

कुसुमापचायखेदं सुकुमारे पाणिपल्लवे कस्मात् ।
वहसि मयि गर्भदासे प्रसादकोऽक्षिण्यधीरमृगनेत्रे ॥

कलावती – चंदिए वन्महपडिकिदीआणीअदु अवइदिं विरएमि ।

[चन्द्रिके मन्मथप्रतिकृतिरानीयतां अपचितिं-
विरचयामि ।]

चन्द्रिका – पच्चक्खमअणे चित्तवडलिहिदे महाभाए एव्व सअलसोहग्गदाअअस्स तस्स सण्णिहाणं होदुत्ति पत्थ अंदीए तुहए अरहणा णिव्वा!दव्व ।

[प्रत्यक्षमदने चित्रपटलिखिते महाभाग एव सकलसौभाग्यदायकस्य तस्य सन्निधानं भवत्विति प्रार्थयन्त्या त्वया अर्हणा निर्मातव्या ।]

कलावती – (चित्रपटाभिमुखमुपविश्य पूजयति)

चन्द्रिका – पुप्फंजलिहत्था णिमीलिअलोअण कंखिअं चिरंचितोहि णअणुम्मीलामसमअं अहं कहं इस्सं ।

[पुष्पाञ्जलिहस्ता निमीलितलोचना काङ्क्षितं चिरश्चिन्तय । नयनोन्मीलनसमयमहं कथयिष्यामि ।]

कलावती –तहत्ति [तथेति] (ध्यानं नाटयति)

चन्द्रिका – (निभृतमागत्य संज्ञां करोति)

राजा – (बुद्धिमती सूचितसंज्ञार्थसरभसमुत्थाय, मणिशेखरविदूषकौ तत्रैव निवेश्य, निर्गत्य, कलावती चरमभागे बुद्धिमत्या स्वयं व्यवधायकतया निहितमलिखितं चित्रपटमपाश्रयन्पूर्वचित्र पटलिखिताऽऽकृतिसदृशं स्थित्वा चिरं निर्वर्ण्य, स्वगतं)

कामाभीष्टनियत्युपासनकलां सङ्क्लृप्तपुष्पाञ्जलि-
क्षेपान्नम्रभुजद्वयान्तरदरस्पष्टीकृतोरुस्तनम् ।
आदर्शामलपार्श्वभावितवलीरेखं पृथुश्रोणिकं
वेणीभूतकचं विभाति चरमं नारीमणेरङ्गकम् ॥

चन्द्रिका – को एसो तुह मव्विब्भमो पव्छाकिलचिन्त-वडोडनकरणव्गहणव्वागहव्था एमए ण विव्णादं । [क एष तव मतिभ्रमः । पश्चात्किल चित्रपटोपकरण-ग्रहणव्यग्रहस्तया मया न विज्ञातम् ।]

कलावती – (तथाविधैव प्रतिनिवर्तते)

राजा – (विलोक्य, सानन्दमात्मगतं)

कस्तूरीतिलकाङ्कितालिकतलं नासा लसन्मौक्तिकं
ताटङ्कप्रतिबिम्बगण्डयुगलं दीर्घाक्षताम्राधरम् ।
प्रावारप्रतनुत्वदर्शितवली वक्षोजरोमावली-
हारं वीक्ष्य वपुस्मरार्तमधिकं नान्यन्मनो वाञ्छति ॥

राजा – (सविमर्शं)

धर्मेणैव पुमर्थता बत तनोरातानवापादना-
दर्थेप्प्येतदनर्थजालजटिलश्चाधिर्यतःप्राप्यते ।
मोक्षे चेत्सुतरां विकल्प्य बहुधा सन्देहबृन्दाकुले
कामे सा नियता ततोऽपि विषयस्त्वेवं विधश्चेत्किमु ॥

राजा – अहो ! रूपातिशयः

वीक्ष्य चित्रपटगामिमां पुरा-
रूपमीदृगपि किं भवेदिति ।
शङ्कतेस्म हृदयं ममाधुना
मन्यते न सदृशीति साऽऽनया ॥

चन्द्रिका - सहि पुव्फंजलिं दाउणउव्मीलणअणाइ ।

[सखि ! पुष्पाञ्जलिं दत्वा उन्मील्य नयने।]

राजा - (सवैमनस्यं, स्वगतं) कथमेतस्या मयि चित्रताबुद्धिर्निश्चयः सम्पत्स्यते । अनिश्चये कथमियमविशङ्कमग्रतःस्थास्यति । तद्विरतौ ममैतद्रसविरामः । अपसरणमप्यनुचितम् । अलमथवा निष्प्रतीकारेण विचारेण । न खल्वघटितघटनापटीयस्या एतस्या मतमन्यथा भवति ।

कलावती - (तथा कृत्वा, विलोक्य, साद्भुतलज्जाभयसम्भ्रमं) चंदिए किं एदं जहपुरं ण चिन्उइ ।

[चन्द्रिके ! किमेतद्यथापुरं न तिष्ठति ।]

चन्द्रिका -कुव्थ पेव्खसि पव्छाकिल चिन्तवडो ।

[कुत्र पश्यसि ? पश्चात्किल चित्रपटः ।]

कलावती - (वलितग्रीवमवलोक्य) सव्चं एसो चिव्तवडो ।

[सत्यमेष एव चित्रपटः ।]

(पुनरग्रतो दृष्ट्वा) को उणएसोपुव्वचिव्तवडादो सदगुणाहिओ । [कः पुनरेषपूर्वचित्रपटाच्छतगुणाधिकः ।]

राजा - (आत्मगतं) अहो ! मौग्ध्यमस्याः यदियमलीकमपि परमार्थं मनुते ।

चन्द्रिका - जदा तुए सिविणओदिव्ठो तदो आरहिअसेआणअने सअलंविपअदणं किदं ।

[यदा त्वया स्वप्नो दृष्टः तत आरभ्य अस्यानयने
सर्व प्रयतनं कृतम् ।]

कलावती – सव्वहा तुए वंचिदाह्मि, जं पधमं एव्व
णव्पदंसिदो ।
[सर्वथा त्वया वञ्चिताऽऽस्मि, यत्प्रथममेव न
प्रदर्शितः ।]

चन्द्रिका – सहि अव्जव समाणीदो अअं एव्व तुज्झ
सअल समीहिदणिव्पादनणिउणो बाहिरव्पाणभूदो
इदं एव्वसंविहाणंदरं ।
[सखि ! अद्यैव समानीतः अयमेव तव
सकलसमीहितनिष्पादननिपुणो बाह्यप्राणभूतः
इदमेव संविधानान्तरम् ।]

राजा –(स्वगतं) एतर्हि संविधानान्तरशब्दार्थोऽवगतः
(लावण्यातिशयं निर्वर्ण्य)
यस्मिन्नङ्गे वराङ्ग्या निपतति नयनं तत्र तद्रूढमूलं
पश्यामीत्यन्यदिच्छत्प्रभवति न मनःकिञ्चिदाकर्षणेऽस्य।
आमज्जं मज्जति द्रागितरदनुपुनर्दिष्टतःकृष्टमस्मिन्
द्रष्टुं सर्वप्रतीकाञ्जिरुपमसुषमा कामये किं करोमि ॥

कलावती – हला चंदिए एव्थव्व मे पूआ रुव्चइ ।
[सखि ! चन्द्रिके ! अत्रैव मह्यं पूजा रोचते ।]

चन्द्रिका – पूअं का उण पणमणं महाभाअं ।
[पूजां कृत्वा प्रणमैनं महाभागम् ।]

कलावती – (प्रणमति)

राजा – (स्वगतं)

विन्यस्य हस्त जानुद्वन्द्वं नतशीर्षमुन्नमच्छ्रोणिम् ।
उन्नम्रवेणिलतिकं वन्दनमस्या मनोहरति ॥

कलावती – (उत्थाय, चन्द्रिकां प्रति साभ्यर्थनं) सहि स बहुसो अलिंगिदपुव्वो अअं विएक्क वारं उवगूहणिज्जो ।
[सखि ! सबहुशो आलिङ्गितपूर्वः अयमप्येकवार-मुपगूहनीयः ।]

चन्द्रिका – (सस्मितं) सहि मा उत्तम्म । तुह सोहग्गविसेसेण एसो एव्व दाणिं पच्चक्खो भविअ दिढं परिरहिअ आणंदइस्सदि ।
[सखि ! मा उत्ताम्य ! तव सौभाग्यविशेषेण एष एव इदानीं प्रत्यक्षो भूत्वा दृढं परिरभ्य आनन्दयिष्यति ।]

कलावती – (सदैन्यं) णं मावणे हि । [एनं मापनय ।]

चन्द्रिका – (सोत्प्रासं) असंक्को विहिणावि अवणेदुं ।
[अशक्यो विधिनाप्यपनेतुम् ।]

राजा – (स्वगतं)

एवमुज्झितकलङ्कमन्वहं प्रेयसीमनसि यस्य संस्मृतिः ।
कीर्तनं प्रियसखी जने रहस्तस्य जन्म हि फलाय कल्पते ॥

कलावती – (वैलक्षण्यमालक्ष्य, सभयलज्जासम्भ्रमं)
चंदिए !
णेत्तम्मिणिमिसव्जुत्तंगत्तम्मि अ उणसरोमंचं ।
वदणं मिसमंदहसं आलेक्खं पेक्ख पच्चक्खं ॥
[चन्द्रिके !
नेत्रे निमेषयुक्ते गात्रे च पुनः सरोमाञ्चम् ।
वदने समन्दहासंआलेख्यं पश्य ! प्रत्यक्षम् ॥]

राजा - (स्वगतं)
निमेषो मर्त्यभावेन रोमाञ्चः परितोषतः ।
मौग्ध्येनास्यास्मितं चापि जायते किं करोम्यहम् ?॥

चन्द्रिका –सहि तुह अणण्णसुलहकामणी अअ
दिदिक्खए किं पुप्फसाअओ दिट्ठि विसओ
संवुत्तो ।
[सखि ! तव अनन्यसुलभकामनीयकदिदृक्षया
किं पुष्पसायको दृष्टिविषयस्संवृत्तः ।]

कलावती – सहि किं मं पदारेसि सो अणंगो खु ।
[सखि ! किं मां प्रतारयसि ? सोऽनङ्गःखलु ।]

चन्द्रिका – (विहस्य) अज्ज तुज्झ सपज्जादिसएण चित्त
किं जुत्तं जिवकलाए ।
[अद्य तव सपर्यातिशयेन चित्रं किं ? युक्तं
जीवकलया ।]

कलावती– अह्मधरे चित्तसालम्मि सव्वणेहिं
पुरोहिदजणे हिं निच्चं पुइदा ओ महेसप्पमुहाओ
देवदा ओ ण हु ईरिसिं सिब्धिं संपत्ताओ ।

[अस्मद्गृहे चित्रशालायां सर्वज्ञैः पुरोहितजनैः नित्यं पूजिता महेशप्रमुखा देवता न खल्वीदृशीं सिद्धिं सम्प्राप्ताः ।]

चन्द्रिका – मक्कंडे अव्स किदे लिंगादो महादेव्वो किदाविब्भावोव्ति पुराणे सुणीअदि ।

[मार्कण्डेयस्य कृते लिङ्गान्महादेवः कृताविर्भाव इति पुराणे श्रूयते ।]

कलावती – सो बालो तह आजळअणो सभव्तो अहरोवि आवव्णव्तिहरो ।

[स बालस्तथापन्नः स्वभक्तस्च हरोऽपि आपन्नार्तिहरः ।]

चन्द्रिका –तुमं वि बाला ईरिसिं अवव्थं संपव्ता सासव्ता अएसो वि आवव्णव्तिनिवारओ ।

[त्वमपि बाला ईदृसीमवस्थासम्प्राप्ता स्वासक्ता च एषोऽपि स्वासक्ता च एषोऽपि आपन्नार्तिनिवारकः ।]

कलावती – सव्व हातुहव अणं मह विव्संभभाअणं ।

[सर्वधा तव वचनं मम विस्रम्भभाजनम् ।]

चन्द्रिका – पिअ सहिव अणं तह विंससणिव्जं ।

[प्रियसखीवचनं तथा विश्वसनीयम् ।]

राजा – (स्वगतं) अनया खलु ! चन्द्रिकया ।

या या शङ्का रचिता तां तां. परिहृत्य साधूक्त्या ।
चित्रपटीबुद्धिरियं चित्रं चित्रं दृढीकृतास्मासु ॥

(सहर्षं) श्रूयेत निःशङ्काविर्भावःएतस्याभावः ।

कलावती – तह जहि किंवि रहव्सं पव्ठुकामाह्मि ।
[तथा यदि किमपि रहस्यं प्रष्टुकामास्मि ।]

चन्द्रिका – सहि जहेव्छं पुव्छ ! [सखि ! यथेच्छं पृच्छ !]

कलावती – अवि णाम जिवंतव्सविअ अव्सवि सव्ववारो संपव्जइ ।
[अपि नाम जीवत इव अस्यापि सर्वव्यापारः सम्पद्यते ।]

चन्द्रिका – जइ चिव्तं जिवाजुन्तं स अलपाणि किव्तं पव्तं ण उणलव्ज सव्धसोव्पाअणणिमिव्तं ।
[यदि चित्रं जीवयुक्तं सकलप्राणिकृत्यपात्रं न पुनर्लज्जा साध्वसोत्पादननिमित्तम् ।]

कलावती – विव्सासकालणं तुह वअणं तहवि आलेव्खं पेव्खिअ लव्जिदह्मि ।
[विश्वासकारणं तववचनं तथापि आलेख्यं प्रेक्ष्य लज्जितास्मि]

(मन्द भणामि इति कण्ठे चन्द्रिकामालिङ्ग्य कथयति)

राजा – (स्वगतं) अहो ! मौग्ध्यमस्याः । नेदीयस्तया रहस्योक्तिरपि श्रूयत एव ।

राजा –. (साऽऽभिलाषं)

एवं मुदा कदा वा स्वैरं स्थास्यामि गाढमुपगूढः ।
अभिलषिते धुरि निहिते कालक्षेपः कथं तु भावनया ॥

किञ्च –

अद्वैतमुक्तिरेवमुक्तिर्ज्ञानेन चन्द्रिकाऽऽहमिति ।
आनन्दं यदमन्दमनुभवदन्यन्मनो न जानाति ॥

(सविचिकित्सं)

विशदीकृतेऽपि भावे ! किं विषयं स्याद्रहस्यमेतदिति ।
शङ्काकलङ्कितत्वान्मध्ये मुग्धं मनश्चलति ॥

(विमृश्य)

न प्रथमं न च पश्चात् ज्ञातं ज्ञेयं किमप्यस्ति ।
अत्रैव मतिरहस्यादास्ते ज्ञातव्यसर्वस्वम् ॥

चन्द्रिका – विअणेवि किं मन्दकहणं उव्जिअं भण दाव।
[विजनेऽपि किं मन्दकथनं ऊर्जितं, भण ! तावत् ।]

कलावती – सोऽवि अएसोवि [स इवैषोऽपि]

(इत्यर्धोक्ते लज्जामभिनयति)

राजा – (सखेदमात्मगतं)

अतछब्दार्थविज्ञानादौपम्यं हृदि बाधते ।
अविमृष्टो विधेयांशस्ततोऽपि किमु वक्ष्यति ॥

चन्द्रिका – (सरोषहुंकारं) किं पुणो पुणोवि लव्जेसि
वदवव्तंवं ।

[किं पुनः पुनरपि लज्जसे वद वक्तव्यम् ।]

कलावती - (सव्रीडातिरेकं) किं उवभोगक्खमो ।
[किं उपभोगक्षमः ।]

राजा - (आत्मगतं)
"वैशद्येन विधेयस्य चेतः साभिप्रसीदति" ।
तच्छब्दार्थान्यथाऽभावे सर्वं सीदेदसंशयः ॥

चन्द्रिका - (सान्तर्हासं, संस्कृतमाश्रित्य)
एनार्थकमपि कृत्वा किं विवादे शतां कुरु ।
तस्य तर्हि न जायेत तादृशः कोऽपि संशयः ॥

राजा - (सपरितोषं, स्वगतं)
तदेतच्छब्दयोर्नूनमभिधेयोऽहमेव सः ।
संविधानमिदं शान्तं श्रोतव्यं च श्रुतं मया ॥

(सरोमाञ्चं)

आलीजने दयितया विजने यथेच्छ-
मावेदितामविदितः परमान्तरङ्गे ।
आसक्तता पिबति यच्छ्रुतिसम्पुटाभ्या-
मानन्दसागरनिमज्जनमेतदेव ॥

कलावती - (स्वगतं) सो एव्व एसो उवभोगक्खमो एव्वेत्ति उत्तं होह मह उणदाणिंवि जिवजुत्तं चिन्तंति बुद्धी ण विरमेइ होदु पेक्खि सं ।

[स एवैष उपभोगक्षेम एवेत्युक्तं भवति । मम पुनरिदानीमपि जीवयुक्तं चित्रमिति बुद्धिर्न विरमति । भवतु द्रक्ष्यामि ।]

[प्रकाशं]

सहि विव्सवधं मं पदे पदे वामोहेसि ।

[सखि ! विस्रब्धं मां पदे पदे व्यामोहयसि ।]

चन्द्रिका - ण कोवि वामो होचिव्तव्स सजिवन्तणे तदभेदो निरूविदो ।

[न कोऽपि व्यामोहश्चित्तस्य सजीवत्वे तदभेदो निरूपितः ।]

राजा - (आत्मगतं)

"एतद्रसलोलुपता चैकत एतद्दयालुता परतः"।
आवृतिविवृतीकर्तुं वाञ्छत एवाद्य किं करवै ॥

किं च -

उत्थातुं प्रतियातुं प्रतिवक्तुं बत ! परिष्वक्तुम् ।
इच्छामि समुत्कतया विनयाच्चित्तं नियच्छामि ॥

चन्द्रिका - (राजानं प्रति नयनसंज्ञां करोति)

राजा- भद्रेयं चिन्तयसे सोऽहं दासस्तव क्रीतः ।
गुरुवृतशिष्यन्यायात्पूज्यो जातोऽस्मि पूजकोऽप्यद्य ॥

कलावती - (श्रुत्वा, सभयसम्भ्रममाश्चर्यं) सहि किं एदं अइविइन्तं चिव्तंवि वाहरइ ।

[सखि ! किमेतदतिविचित्रं, चित्रमपि व्याहरति ।]

चन्द्रिका – सजिवचिन्तव्स सव्वं संभाविव्ज इति सोडणवि किं अध्ठरिअं मुणसि ।
[सजीवचित्रस्य सर्वं सम्भाव्यत इति श्रुत्वापि किमाश्चर्यं जानासि ।]

राजा – (स्वगतं) पुनश्च संविधानमिदं मूलं स्पृशति ।

कलावती –(व्यामुह्यन्ती स्थिता)

चन्द्रिका – (जृम्भाव्याजेन छोटिकां ददाति)

बुद्धिमती – (संस्कृतमाश्रित्य)

यं लावण्यनिकेतनं युवतयः शंसन्ति मूर्तं स्मरं
यद्वीक्षा विदुषां मनः कुमुदिनी राकालसत्कौमुदी ।
यस्य ज्यानिनदः परगृहविनिग्राहैकमन्त्रायते
यच्चित्तं शिवसक्तमेषसमहीपालाग्रणीर्नन्दकः ॥

कलावती – (साश्चर्यं) किं एदं ? असरीरिणीवाणी सुणीअदि ।
[किमिदं अशरीरिणी वाणी श्रूयसे ।]

चन्द्रिका – जावि कावि होदुअव्थो वव्णणिव्जो ।
[यापि कापि भवत्वर्थो वर्णनीयः।]

कलावती – (स्वगतं) सो एसो णंदओव्तिभणिदं आसि ।
[स एष नन्दक इति भणितमासीत् ।]

(प्रकाशं)

पढमं वाणी सरूवं विण्णवेहि तदो अत्थं कहेमि ।
[प्रथमं वाणी स्वरूपं विज्ञापय। ततोऽर्थं कथयामि ।]

चन्द्रिका – (पुनश्च छोटिकां ददाति)।

बुद्धिमती – (मुखं दर्शयति)

कलावती – (सविस्मयं) कहं बुद्धिमदीविअ किं इंदजालं दंसेसि ।
[कथं बुद्धिमतीव किं इन्द्रजालं दर्शयसि ।]

चन्द्रिका – मअणेंदजालं । [मदनेन्द्रजालम् ।]

कलावती – हला चंदिए एआरिसं संविहाणणेउण्णं कुदो संपण्णं । होदु । चित्तं जिवजुत्तं, इअं कहं आअदा ।
[सखि ! चन्द्रिके ! एतादृशं संविधाननैपुण्यं कुतः सम्पन्नम् ? भवतु । चित्रं जीवयुक्तमियं कथमागता।]

राजा – (स्वगतं) दुष्परिहरेयं शङ्का ।

चन्द्रिका – अइमुद्धे इअं एव्व एदंसआ णत्ती ।
[अतिमुग्धे ! इयमेवैतस्या नेत्री ।]

कलावती – जिवंतस्स कहं अण्णेण अणअणं ।

[जीवन्तः स कथमन्येनानयनम् ।]

चन्द्रिका - एसो दाणिं खु सप्पाणो ।
[एष इदानीं खलु सप्राणः ।]

राजा - (आत्मगतं)

सप्राणता पुरा मे निश्वासोच्छ्वासवातेन ।
विषयग्राहितया चेदद्यैव हि सैव सा नाद्या ॥

(सस्मरणव्यथं)

एतस्या मौग्ध्यमिदं स्वस्यापि ममापि सुखकरं भवति ।
पूर्वं चेन्मम धिक् धिक् शिव शिव हा हन्त ! हा हन्त ! ॥

(सस्पृहं)

चक्षुष्मत्त्वं सफलमभवच्चाक्षुषेणाऽऽद्य तन्व्याः-
प्रत्यक्षेण श्रुतियुगमिदं वाक्सुधाकर्णनेन ।
चित्तं नित्यस्मरणशरणं निवृतंगात्रमेत-
द्गाढाश्लेषं हर हर कदा लप्स्यते कामतप्तम् ॥

कलावती - (तूष्णीमास्ते)

चन्द्रिका - (पुनरपि छोटिकां ददाति)

बुद्धिमती - (चित्रपटं पातयति)

कलावती - सलज्जाभयसम्भ्रममुत्तिष्ठति ।

राजा - (सव्यथमात्मगतं)

न मया न च.चन्द्रिकया न बुद्धिमत्या न चान्ततोऽप्यनया ।
किमपि तु मौग्ध्येनास्या उपकृतमेतदपि यातमेकपदे ॥

[प्रकाशं]

अयि ! सुन्दरि ! अलमतिसम्भ्रमेण !।

कुचकुम्भयुग्मभाराक्रमणनिपीडितवलग्नभुग्नतया ।
आलम्ब्य किङ्करं मां अर्हसि मन्दं समुत्थातुम् ॥

चन्द्रिका – (सस्मितं, सहस्तग्राहमाकृष्य)

सहि समव्वं सजिवचिव्तविलासं अदव्तूण अव्ढे एव्व कुदो ओसरसि एदं सजिवदाए जव्थकुव्थवि गदं तुमं ण मुंचेइ ।

[सखि ! समग्रं सजीवचित्रविलासमदृष्ट्वार्ध एव कुतोऽपसरसि । एतत्सजीवतया यत्र कुत्रापि गतां त्वां न मुञ्चति ।]

कलावती –(सत्वरं हस्तं व्याधूय, निमीलितलोचना तस्या एव आचरमभागमपाश्रयति)

राजा –

कस्यापि न चन्द्रिकया व्यवधाक्रियते विशेषतो राज्ञः ।
मुग्धे वाञ्छसि किमिति व्यवधातुं गात्रमनयैव ॥

चन्द्रिका - जदो चंदिआ सआसे पंकअं संकुअ इ अदो मएओसरिदव्वं ।.

[यतश्चन्द्रिका सकाशे पङ्कजं सङ्कुचति, अतो मयाऽऽपसर्तव्यम् ।]

राजा – एतद्राज्ञश्च समानम् ।

चन्द्रिका – बुद्धिमदि एसा तुए दिढं गहिदव्व ।
[बुद्धिमति ! एषा त्वया दृढं गृहीतव्या ।]
(इति व्याहृत्य राजानं प्रति संज्ञां करोति)

राजा –(बुद्धिमत्या सह पश्चाद्भागे निश्चलमागत्य, बाहुमूलप्रवेशितेन भुजयुगलेन कलावतीं गाढमुपगूह्य, सानन्दातिशयं, स्वगतं)

आख्यां त्वेव शिरांस्यकृत्रिमगिरामानन्दपारंपरीं
वेदाभ्यासजडान्तरश्चरमतां तत्रैव मन्ये त्वहम् ।
शृङ्गाराख्यरसं कवेर्निगदितो यूनश्चिरात्प्रेयसी-
गाढाश्लेषजुषश्च वेत्ति न सुरोऽप्यानन्दसिन्धोर्लवम् ॥

कलावती – (तथापि, निमीलितलोचनैव स्थिता)

चन्द्रिका – हला कलवदि अहं गामिव्सं सव्वं महासंविहाणं कदव्थी किदं जदो चिरकंखिदं महाभाअं दिव्ठिएवि ण संभावेसि ।
[सखि ! कलावति ! अहं गमिष्यामि, सर्वं मम संविधानं कदर्थीकृतं, यतश्चिरकाङ्क्षितं महाभागं दृष्ट्वापि न सम्भाव्यसि ।]

कलावती – (स्वगतं) ह व्थि । सहा वसिन्धेण मोव्धेण किं ति झति ओसरि अं चिव्तवडावण अणेण पदालण णिव्णएवि तं एव्व मुग्धतणं पुराकदुअ खणमेव्तं तव्थ एव्व अवव्ठाणे होव्ज खु तं

किदि णिव्भरपरिरंभो अहव एन्वं चदुराए चंदिआए संविहाणबलेण एव्थएव्व दण अहिलासेण होदव्वं ।

[हा धिक् ! स्वभावसिद्धेन मौग्ध्येन किमिदं झटिति अपसृतं चित्रापटापनयनेन प्रतारणनिर्णयेपि तदेव मुग्धं त्वं पुरस्कृत्य क्षणमात्रं तत्रैवावस्थाने भवेत्, खलु तत्कृतो निर्भरपरिरम्भः । अथवा एवं चतुरायाश्चन्द्रिकायाः संविधानबलेन अत्रैव-तेनाभिलाषेण भवितव्यम् ।]

[प्रकाशं]

(चक्षुरुन्मील्य) हला चंदिए कुव्थ महाभाओ .

[हला ! चन्द्रिके ! कुत्र महाभागः ।]

चन्द्रिका - दिव्ठिएवि ण गो अरीकिदो ह्मिव्ति कुविदो फुदोवि गदो ।

[दृष्टापि न गोचरीकृतास्मीति कुपितः कुतोऽपि गतः ।]

कलावती - (सखेदभयकम्पं) हुंगदो चंदिए किं उवव्खिअं अहवा परिआरि आ बुद्दिमदी ण णिवव्टेइ मह अधव्णंदाए तुह्माणंईरिसो बुव्धी समुव्पव्णा ।

[हुंगतश्चन्द्रिके ! किमुपेक्षितं अथवा परिचारिका बुद्धिमती न निवर्तयति मम । अधन्यतया युवयो-रीदृशीबुद्धिः समुत्पन्ना ।]

(चन्द्रिकां करे गृहीत्वा) चन्दिए बुव्धिमदी आआरंदरेण

तुमं एव्व अदो विन्सद्धं भणामि सिवणअदंस
आरहि अ ईरिसं दसाविसेसं अणुहोंती तु
सामव्छेण जव्स समाअमोहोव्जव्ति आसा
आसारेण पाणधालणं कुणंती तव्
बाहिरव्याणव्स महाभाअव्स पुरदो तुह वं चणे
तुव्झा व अणव्मि सव्चव्त ण मणीसा
महापव्णावामोहेण असंभाविदाए चिव्तडबुधी
सेरंठाणेण सागदा हिणं दणाभावेण झव्
पव्चव्खदंसणेण अअ इवालि आहि अअ
खणमेव्तं विपुरदाठादुं किंचि वि वारिदुं अंदद
पेव्खिदुं वि अव्खमा तव्कालाहं पुव्विअ
संभूदचरिअहरिससव्धसावेवहुपमुह--भावादि
आमव्थआरुढे ण वंमहेण अव्ग दोणी अव्दी
गुणीकिंदाएलज्जाए किंवि कादव्वं अजाणंत
परिअअवासणाए तुह णिअडे णिवदिदाह्मि।

[चन्द्रिके ! बुद्धिमती आकारान्तरेण त्वमेव अत
विस्रब्धं भणामि। स्वप्नदर्शनमारभ्य ईदृ
दशाविशेषमनुभवन्ती तव सामर्थ्येन यस्य
समागमो भवेदिति आशामृता सारेण प्राणधार
कुर्वन्ती तस्य बाह्यप्राणस्य महाभागस्य
पुरतस्तववञ्चनेन तववचनेन सत्यत्वमनीषया म
प्रज्ञाव्यामोहेन च सम्भावितया चित्रपटबुध्या स्वैरं
स्थानेन स्वागताभिनन्दनाभावेन झटिति प्रत्यक्ष-
दर्शनेन अतिव्याकु लहृदयाक्षणमात्रमपि पुरत

स्थातुं किञ्चिदपि व्याहर्तुमन्ततः प्रेक्षितुमप्यक्षमा तत्कालाहंपूर्विकासंभूताश्चर्यहर्षसाध्वसवेपथु-प्रमुखभावातिशया मस्तकारूढेन मन्मथेन अग्रतो नीयमाना, द्विगुणीकृतया लज्जया किमपि कर्तव्यमजानाना परिचयवासनया तव निकटे निपतितास्मि ।]

चन्द्रिका –सहि सव्वहा फलिदमणरहासि ।
[सखि ! सर्वथा फलितमनोरथासि ।]

कलावती – मह मणरहेण विज्जुलेहा इदं ।
[मम मनोरथेन विद्युल्लेखायितम् ।]

चन्द्रिका –(सान्तर्हासं) सो केरिसो [स कीदृशः ?]

कलावती – (सविषादं) किं दाणिं तव्स कहणेणः ।
[किमिदानीं तस्य कथनेन ।]

चन्द्रिका – अहुणा किं अदिक्कंदं का वा तुह सोहग्गव्सणूणदा ।
[अधुना किमतिक्रान्तं का वा तव सौभाग्यस्य न्यूनता ।]

कलावती – (सबाष्पगद्गदं) सहावलंबणसमए उवन्घरुखे पडिऊलसमीलणेण दूरं अणहिमहं परावव्जिदे जापदाणिणीए ।
[शाखावलम्बनसमये उपघ्नवृक्षे प्रतिकूलसमीरणेन दूरमनभिमुखं परावर्जिते याप्रतानिन्याः ।]

राजा - (स्वगतं) अतिवियोगभीरु महदिदमद्भुतं न जानासि, यदधुना ।

उपघ्नपादपं लोके स्वयमालम्बने लता ।
उपसृत्य सतां दूरादुपगूह्य वितिष्ठते ॥

चन्द्रिका - सहि एहि अगो दूरगो वि अणुऊलपमंजणेण अइवेलं अहिमुहं आवजिदो स अं एव्व वेव्ठि दवंतोव्ति भणिदव्वं चिव्ठदु एदं हिअअं विव्णवेहि । [सखि ! इदानीं अगोदूरगोऽपि अनुकूलप्रपञ्जनेन अतिवेलं अभिमुखमावर्जितः स्वयमेव वेष्टित-वानिति भणितव्यम् । तिष्ठत्वेतत् हृदयं विज्ञापय ।]

राजा - (आत्मगतं)

एकान्ते चेत्स्वाशयोद्घाटती स्या-
त्कान्ता वार्ता कामुकानां न तृप्त्यै ।
श्रावं श्रावं प्रेयसीभावबन्धं
भूयःश्रोतुं चित्तमिच्छत्यतृप्तम् ॥

कलावती - (दीर्घमुष्णं विनिश्वस्य) चंन्दिए अव्ज तदहिव्या अकहणं गदजलसेदुवंधणणाआणुसरणं तहवि तुझणिव्वंधेणभव्णइ । मए तव्स महाभाअव्सं । [चन्द्रिके ! अद्य तदभिप्रायकथनं गतजल-सेतुबन्धनन्यायानुसरणम् । तथापि तव निर्बन्धेन भण्यते, मया तस्य महाभागस्य ।]

(इत्यर्धोक्ते वाक्स्तम्भं नाटयंति)

चन्द्रिका – सहि मा भआहि । विदिदं तुह अहि लसिदं तंवि उवणदं तहवि तुह मुहेणविण्णापव्वंति णिव्वंधो ।

[सखि ! मा भैषीः । विदितं तवाभिलषितं तदप्युपनतं तथापि तवमुखेन विज्ञातव्यं इति निर्बन्धः ।]

कलावती – बाहुपञ्जरसुईए । [बाहुपञ्जरशुक्या ।]

(इत्यर्धोक्ते पुनरपि वाक्स्तम्भमभिनीय, कथमपि सधैर्यावष्टम्भं)

होदव्वंति मव्झ माणीसिदं [भवितव्यं इति मम मनीषितम्]

(इति विषादं नाटयति)

राजा – (स्नेहात् दृढतरं परिरभ्य, सानुशयं, स्वगतं)

मद्गति वार्ताश्रवणादमन्द एतत्पयोधरस्पन्दः ।
दृढघटितौ मम वाहू उद्यम्योद्यम्य पातयति ॥

तदविलम्बोऽयमात्मप्रकाशनावसरः, अथवा चन्द्रिकयैव प्रकाशयति ।

चन्द्रिका - (विहस्य) तहजादं अव्याणं ण आणासि एसो महव्भ्रमो बुव्धि विआरेण पुरिसव्स जिवव्भमो विअ बुव्धिमदी दिवि आरेण णिवव्टणिव्जो ।

[तथाज्ञातमात्मानं न जानासि एषो महान्भ्रमः बुद्धिविचारेण पुरुषस्य जीवभ्रम इव बुद्धिमतीविचारेण निवर्तनीयः ।]

कलावती –(सवितर्कं, आत्मगतं)

इत्ति आअंइत्ति पच्चुतिमालि आअं बुद्धिमदं किंवि ण जप्पदिसो महाभाओवि ण दीसइ चंदिआवि तहजादं अप्पाणं ण आणासित्ति गदइ आलिंगणंमि पडिक्खणं गाढत्तं तणंता पुव्वंविअ एदंवि पदालणं पडिभाई ।

[एतावत्यामुक्तिप्रत्युक्तिमालिकायां बुद्धिमती किमपि न जल्पति स महाभागोऽपि न दृश्यते चन्द्रिकापि तथाजातमात्मानं न जानासीति गदति। आलिङ्गनेऽपि प्रतिक्षणं गाढत्वं तस्मात्पूर्वमिव एतदपि प्रतारणं प्रतिभाति ।]

(हृदयं विलोक्य, राजनामाङ्कितमङ्गुलीयकं दृष्ट्वा, ससम्भ्रमहर्षस्वेदरोमाञ्चं, स्वगतं)

हिअअ मा उत्तंम चिरकाल कंखिदो मणरहो उवणदो मुहुत्तं अवि आणंतं विअ णिव्वुदं होहि ।
[हृदय मा उत्ताम्य चिरकालकाङ्क्षितो मनोरथो-पननतो मुहूर्तमविजानन्तमिव निर्वृतं भव ।]

(विमृश्य सनिर्वेदं)

सत्ति अभावसमुदाओ पअइस्सइ किं कादव्वं ।
[सात्विकभावसमुदायः प्रकटयिष्यति किं कर्तव्यम् ।]

[प्रकाशं]

सहि असंबद्धं किंवि किंवि पलपसि अहं गमिस्सं तुमं आअछवा मा वा ।

[सखि ! असम्बद्धं किमपि किमपि प्रलपसि ।
अहं गमिष्यामि त्वमागच्छसि ? वा मा वा ।]

राजा – (स्वगतं) विदितोऽहं असंशयमनया ।

यतः –

सञ्जातधर्मसलिलं गात्रं रोमाञ्चकंचुकितम् ।
मदनुप्रवेशलिप्सा दृढघटितं चैव चरमाङ्गम् ॥

चन्द्रिका –(सोपहासं) पंजरव्ठिदाए सुईए कहं गमणं ।
[पञ्जरस्थितायाः शुक्याः कथं गमनम् ।]

कलावती – (सलज्जं) सहिमोएहिमं ।
[सखि ! मोचय ! माम् ।]

चन्द्रिका – का अहं बंधणस्स वा विसव्जणव्वा जेण बव्धासि देण मोव्तवा ।
[काहं बन्धनस्य वा विसर्जनस्य वा येन बद्धासि तेन मोक्तव्या ।]

कलावती – (स्वगतं)

चिव्तवड धी विरामेरिव्तं णेव्तं सुहाअ जह सिव्तं ।
बुव्धिमदी बुव्धिलए आणदेण तह पुरिअं हिअअं ॥
माणसमातुवरेहि संमुह परिसंग सव्मवि णुह-
विव्ससि ।
[चित्रपटधी विरामे रिक्तं नेत्रं सुधया यथा सिक्तम् ।
बुद्धिमती बुद्धिलये आनन्देन तथा पूरितं हृदयम् ॥
मानसमातुरससम्मुखपरिष्वङ्गशर्मापि अनुभविष्यसि।]

[प्रकाशं]

अहव अहं एव्व बलादोगमिव्सं ।

[अथवा अहमेव बलाद्गमिष्यामि ।]

(बाहुबन्धं शिथिलयति)

राजा – (अभिमुखालिङ्गनाय भुजबन्धं स्रंसयन्, स्वगतं)

एकैक विषयवत्वात्करणग्रामः प्रवर्तते निभृतम् ।
त्वं सर्वाविषयभावाच्चेतच्चेतस्ततो भ्रमसि ॥

पूर्वंकथमसहिष्ठाःकथं नु पश्चात्सहिष्यसे विरहम् ।
कथमद्य न सहसे दरशैथिल्यं बाहुबन्धस्य ॥

अविमुश्चदङ्गपालिं ग्रहणं वीक्षणमुरोजवदनस्य ।
दुर्घटमेतद्वाञ्छत्कष्टं डोलायसे भूयः ॥

(कथं कथश्चिदेकेन बाहुना परिष्वज्य परेण प्रतिमुखं निवर्त्य, गाढमाश्लिष्यप्रमोदातिशयमभिनीय)

वैधेसौधे निविश्य श्रुतिशतपठनादाहुरानन्दमेके
वैकुण्ठे कण्ठलम्बांबुजमणितुलसीदामभूम्नैव केचित् ।
नाकेनाकेशवेश्याविहृतिविरचनावश्यभावात्परेऽहं
निःसीमप्रेमकान्ता निबिडकुचतटी निर्भरालिङ्गनेन ॥

(सवितर्कसन्तोषं)

धारा किन्नु हि माम्भसां किमु कृता मालासुमैःपल्लवैः-
किं मुक्तामणियष्टिरम्बुजदलश्रेणीजलार्द्रा किमु ।
भद्रश्रीरससारिणी किम्रथवा चान्द्रीकला किं प्रिया
तस्रा यःसदृशं क्षणेन हृदयं जातं सुशीतं मम ॥

(विचिन्त्य, साक्षेपसमर्थनं)

धर्मार्थकाममोक्षान्पुरुषार्थ इति वदन्ति. तन्मिथ्या ।
श्रुतिचित्रदृष्टिचाक्षुषपरिरम्भानेन तान् मन्ये ॥

(विचार्य, सपरितोषं)

यद्यातुरोत्कण्ठितयो रहस्थिति-
र्गाढोपगूढःकरणीयतापदम् ।
तत्राभिमुख्यं किमनाभिमुख्यं
तत्तावकं संशयतोऽन्यदस्ति किम् ॥

कुतः ?

एकत्र जागर्ति कुचग्रहाख्यः -
साम्राज्य सौख्यातिशयप्रसक्तिः ।
परत्र चेद्गर्जति कामलीला-
सर्वस्वभूताधरविम्बपानम् ॥

(सानन्दस्तम्भं)

अदृष्टौ संदृष्टिर्ममहृदयमैच्छत्परमयो-
श्चिरादस्यां सत्यां दृढतरपरिष्वञ्जनसुखम् ।
इदनीमेतस्मिन्परमपुरुषार्थे कथमपि
प्रवृत्ते व्यावृत्तेतरकथममज्जं न चलति ॥

(वक्षस्थलमवलोक्य)

मम हृदये मग्नाग्रौ महिलावक्षोरुहौ मन्ये ।
अङ्गजगजयूथपतेःकलाघातं वितन्तवतःकुम्भौ ॥

अयि ! सुन्दरि ! कृतं त्वरया ।

चित्रपटी मृगतृष्णा तृष्णाशान्तिं पुरा वितन्वानः ।
प्रत्यक्षामृतलाभे त्यक्तुं शक्तःकथं झटिति ॥

(वामेनकरेण वेणीमधस्तादाकृष्य परेण चिबुकमुन्नमयति)

कलावती – (सापत्रपं नेत्रे निमीलयति)

राजा – (सस्पृहं)

चित्रपटबुद्धिसमये मयि ते दृष्टं विशालमक्षियुग्म् ।
अधुनाऽऽपि तद्दिदृक्षे क्षणमुन्मीलय चकोरनयने त्वम् ॥

कलावती – (स्वगतं)

लज्जे णमोणमोदे पुव्वं कुव्थवि गदासि विरहम्मि ।
ओसर दूरंदाणिं माणसचोरं चिराय पेव्खामि ॥
[लज्जे नमोनमस्ते पूर्वं कुत्रापि गतासि विरहास्मि ।
अपसर दूरमिदानीं मानसचोरं चिराय पश्यामि ॥]

(कथमपि समन्दहासं पश्यति)

राजा –

चन्द्रः कलङ्कवत्वात्पङ्कजमपि हन्त ! पङ्कजन्मत्वात् ।
न सदृगनवद्यलेशं तव सुमुखि मुखस्य मुखमेव ॥

(सश्लाघं)

चन्द्रमुखि ! भीरुभवतीं चन्द्रोपलसालभञ्जिकां मन्ये ।
राजकरस्पर्शवशात् धर्मव्याजाम्भसां क्षरणात् ॥

(करकिसलयेन वदनसरोजं परिमृजन्)

स्वेदाम्बुकणविकीर्णं मुखसरसिजमेतदाभाति ।
अरविन्दमिव विभाते मकरन्दकणावली पूर्वम् ॥

(निर्वर्ण्य सोत्कण्ठं)

भूषणभूष्यत्वं स्यान्मण्डनवपुषोरितीतरत्रैव ।
त्वामधिकृत्य सुगात्रि ! विपरीतमिदं विभात्येव ॥

(संशयोद्धाटनं)

आनीलचिकुरभारानाघ्रायाघ्राय मृगमदामोदान् ।
आसक्तिभूययोगादाशासे घ्रातुमेव भूयोऽपि ॥

(साभ्यर्थनं)

भूमावाहितहस्तजानुयुगले नम्रोत्तमाङ्गं दरं
भुग्नाग्रोर्ध्वगवेणिदण्डमधिकप्रोद्यन्नितम्बस्थलम् ।
क्लृप्तायाः प्रणतेःपुरा प्रणयभूःकोपोपशान्तिच्छला-
दानृण्यं शतशःप्रणम्य सुतनोस्सम्पादयिष्याम्यहम् ॥

(सानुनयं)

अङ्गेन ते ममाङ्गं नयनं नयनेन मिश्रितश्चासीत् ।
नालीकसौरभमुचा वाचावाचं विमिश्रयाब्जाक्षि ॥

कलावती - (स्वगतं)

पच्चुत्तरपच्चासापणुदइ वअणाइ कण्ठदो उपरि ।
लज्जा उण अअहोहो किं णु खुकंजं मए अणीसाए ॥
[प्रत्युत्तरप्रत्याशाप्रत्याशाप्रणुदति वचनानि कण्ठतोरुपरि ।
लज्जा पुनश्चाधोधःकिं नु खलु कार्यं मया अनीशया ॥]
(सविमर्शं)

एदा अपि असहि ओ एसो उणबाहिरव्पाणो ।
मंदक्खमिदममन्दं दूरीकादुं समव्यंह्मि ॥
[एते प्रियसख्यौ एष पुनर्बहिप्राणः ।
मन्दाक्षमिदममन्दं दूरीकर्तुं समर्थास्मि ॥]

(सधैर्यावष्टम्भं) अव्अ उव्त । [आर्य पुत्र!]

(इत्यर्धोक्ते, सापत्रपमवचना तिष्ठति)

राजा - (सस्नेहबहुमानं)

चतुरक्षरसम्बोधनमिदमेवालश्चतुःपुमर्थान्मे ।
सम्पादयितुंभूयःशुश्रूषा श्रोतुमिच्छति स्वैरम् ॥

कलावती - (स्वगतं)

एव्वं काऊण कहं भूयो वाअं अमव्तणं कुणसि ।
लव्जेलव्जाहीणे इदोवरं वा विसव्जेहि ॥

[एवं कृत्वा कथं भूयो वाचंयमत्वं करोषि ।
लज्जे लज्जाहीने इतः परं वा विसर्जया ॥]

[प्रकाशं]

अकिदादिहि सव्कारा अहं निक्खव्तवा किंति पव्चुव्तरं दाइव्सं ।
[अकृतातिथिसत्कारा अहं निरपत्रपा किमिति-प्रत्युत्तरं दास्यामि ।]

राजा - (आत्मगतं)

दर्शनमुपांशुदेशे स्वैरं सम्भाषणं मिथो यूनोः ।
गाढाश्लेषश्च यदि त्रयमिदमलमन्यदस्तु वामा वा॥

(सनिर्वेदं)

दृष्टं श्रुतं परिष्वक्तं वदनं वचनं वपुः ।
करोमि यदि हन्ता सा वानन्दस्तम्भसम्भवः ॥

[प्रकाशं]

सुन्दरि ! मामैवं

आसनमेव सहासनमर्घ्यं पाद्यं च दूरतस्तेस्ताम् ।
भोजनमेव सभाजनमातिथ्यं कीदृगन्यता शास्यम् ॥

चन्द्रिका – खत्तिअ जोग्गेण गंधंवविवाहेण विरह कादरो अअं जणो अणुकंपिणिज्जो ।
[क्षत्रिययोग्येन गान्धर्वविवाहेन विरहकातरोऽयं जनोऽनुकम्पनीयः ।]

राजा –

आद्येन वा तुरीयेण दद्यादिन्द्रसखःसुताम् ।
उपायेन ततो मास्तु गान्धर्वोपयमो मम ॥

कलावती - (स प्रेमानुबन्धं) विलंबो होदि ।
[विलम्बो भवति]

चन्द्रिका – (विहस्य) सुदं अज्जेण [श्रुतमार्येण]

कलावती – (स्वगतं) चावलादि सएण किंवि णिग्गअं ।
[चापलातिशयेन किमपि निर्गतम् ।]

[प्रकाशं]

(सावहित्थं) सहि घरगमणे विलम्बो होदित्ति गदिअं अण्णहा समत्थेसि ।
[सखि ! गृहगमने विलम्बो भवतीति गदितम् । अन्यथा समर्थयसे ।]

चन्द्रिका –(सवैलक्ष्यस्मितं) अणवसरपत्तं खु एदं ।
[अनवसरप्राप्तं खल्वेतत् ।]

राजा – (सस्मितं) उभयमपि प्रसक्तं को दोषः ।

[नेपथ्ये]

चंदिए केत्तिअं कालं विलंबेसि । भट्टिणी समाअरिद णिव्यविहि मंगला भुबुक्खिआ पडिक्खइ भट्टिदारिअं तुवरेहि तुवरेहि ।

[चन्द्रिके! कियन्तं कालं विलम्बसे । भट्टिनी समाचरितनित्यविधि मङ्गला बुभुक्षिता प्रतीक्षते । भर्तृदारिकां त्वरस्व ! त्वरस्व !]

(सर्वे समाकर्णयन्ति)

चन्द्रिका – सहि अह्माणं उवमादा मंजुवाणी अव्जाए भोअणवेला अदिक्कमदित्ति तुवरेदि आमंतेहि महाभाअं ।

[सखि ! अस्माकमुपमाता मञ्जुवाणी मातुर्भोजनवेलातिक्रामतीति त्वरयति । आमन्त्रय ! महाभागम् ।]

कलावती – (स्वगतं) चादअव्वदवदीए मह किंअण्णं भोअणं रुच्चइ ।

[चातकव्रतवत्यै मह्यं किमन्यद्भोजनं रोचते]

(विमृश्य, सखेदं) कोरिसं आमंतणं कहं णिग्गमणं कहं अवट्ठाणं का वा गइत्ति पव्आ उलं हिअअं ।

[कीदृशमामन्त्रणं कथं निर्गमनं, कथमवस्थानं का गतिरिति पर्याकुलं हृदयम् ।]

[प्रकाशं]

सहि किमुवा आरवअणं करिस्सं अप्पणो । अणीसदाए गच्छामित्ति सअल णिआमआदाए चिट्ठेत्ति वा वत्ता ण जुता अहवा तारिस समुल्लास अरस्स हिमअरस्स कुमुदिणीरइणो पोम्मिणीं अकिमुवआरवअणं कुणइ ।

[सखि ! किमुपचारवचनं करिष्यामि आत्मनोऽनीशतया गच्छामीति सकल नियामकतया तिष्ठेति वा वार्ता न युक्ता । अथवा तादृश समुल्लासकरस्य हिमकरस्य कुमुदिनीरवेः पद्मिन्याः किमुपचारवचनं करोति ।]

राजा – (सपरितोषं)

कुमुदिन्या यो भावश्चन्द्रे सूर्ये च पद्मिन्याः ।
मय्यप्येष तव स्याद्यदि कृतमन्यैर्निरर्थकैर्वचनैः ॥

(विचिन्त्य, सनिर्वेदं)

श्रेयोपेक्षासमयो दीर्घादीर्घःपुनर्दीर्घः ।
प्रादुरभूत्तदेतस्मिन् अनुभवकालस्तनुर्भवति ॥

(सदैवोपालम्भं)

चिरकालकाङ्क्षितानां लाभे कल्पान्तसुस्थितिर्माभूत् ।
द्वित्रयुगस्थितिदाने धातुःकिं व्रजति दुर्विदग्धस्य ॥

एतन्निर्वृतेराकल्पावस्थानमपि न पर्याप्तम्। गुरुजननिदेशश्च दुर्वारः । श्रेयांसि बहुविघ्नानीति युक्तोऽभियुक्तवादः ।

(मन्दं मन्दं भुजबन्धं शिथिलयति)

कलावती - (मुक्ताप्यमुक्तेव स्थित्वा) सहि मं तुह सविहमुपणेहि ।

[सखि ! मां तव सविधमुपनय !]

चन्द्रिका - (विहस्य) मुक्तं वि अत्ताणं ण आणासि ।

[मुक्तमप्यात्मानं न जानासि ।]

कलावती - सहि दिढबंधणेण मोअणं ण विण्णादं ।

[सखि ! दृढबन्धनेन मोचनं न विज्ञातम् ।]

(कथमपि सखीसमीपमुपसृत्य, विश्लेषकातर्यमभिनयति)

चन्द्रिका - (सबाष्पगद्गदं) अंअ एदाए जणओ दुरिहिमाणिदाए संदावजणओजणणीउणत-वस्सिणी इत्ति ओ एव्व मे बुद्धि विहओ चिरादो सव्अल-सोहग्ग कालजंति विहिद एदं संविहाणं । एआरिस विसादणिहाणं संभाविआ सिविणअसमा अमा भव्याणलगइ णिव्हा चित्तवडपेक्खणं वि जहपुरं ण हिअअविणोदण विअक्खणं इदो वरं सम्बन्धो संपडिबन्धो तदो मह सहीए मअणदसासु चरमदसासअणं सरणं ।

[आर्य ! एतस्या जनको दुरभिमानितया सन्तापजनकः जननीपुनस्तपस्विनी इयानेव मे बुद्धिविभवः चिरात्सकलसौभाग्यकारणमिति

विहितमेतत्संविधानं . एतादृशविषादनिधानं सम्भावित स्वप्नसमागमभद्रा न लगति निद्रा । चित्रपटप्रेक्षणमपि यथापुरं न हृदयविनोदन-विचक्षणम् । इतः परं सम्बन्धः स प्रतिबन्धः ततः मम सख्या मदनदशासु चरमदशाश्रयणं शरणम् ।]

(इति सख्या समं विषादं नाटयति)

राजा - (सखेदसम्भ्रममुपसृत्य, प्रेयसीमाश्लिष्य)

भद्रे !

संयोगो वा वियोगो वा समानोऽयं द्वयोरपि ।
अन्तर्बहिरधीरा त्वं बहिर्धीर इवास्म्यहम् ॥

(सधैर्यसन्धुक्षणं)

संयोगो वा वियोगो वा प्रेयस्याः प्रेयसोऽपि वा ।
नेदीयान्वा दवीयान्वा स्वजनो हृदयङ्गमः ॥

संयोगे चेतसोस्सम्यक् सम्भूते समरागयोः ।
काययोगेन सम्मर्दे कस्याप्युपनतेन किम् ॥

कलावती - (साश्रुगद्गदं) इदो वरं वइअरे पडिबंधसंकाए वाउलो होइ मे हिअअं ।

[इतः परं व्यतिकरे प्रतिबन्धशङ्कया व्याकुली भवति मे हृदयम् ।]

(इतिं साश्रुमुखी तिष्ठति)

राजा -

अश्रूणि यावन्ति पतन्ति खेदा-
दानन्दजान्येव भवेयुरग्रे ।
वियोगमारोपमियानपिस्या-
त्संयोगभूम्नः प्रतिपादनाय ॥

(सप्रत्यूहनिरासं)

रात्रिर्गताप्युदितवान् भगवाननूरुः-
पद्मिन्यपि स्फुरविजृम्भदुदारपद्मा ।
स्वल्पान्धकार हिमयोः प्रतिबन्धशक्तिः -
कालं कियन्तमुदयं प्रतिबन्धुमीष्टे ॥

(साश्वासनं)

शुभहेतुर्नौसुतरां संयुज्य विद्युञ्जतोर्झटिति ।
चक्रपतद्दम्पत्योः प्रत्यूष इवैव सङ्केतः ॥

चन्द्रिका - (सवैक्लव्यं) कमव्ण आ धणव्स साहा रणदाए पव्थणं पदाणां अ पडिणिअदं ण होदि ।

[कन्यकाधनस्य साधारणतया प्रार्थनं प्रदानं च प्रतिनियतं न भवति ।]

राजा - (सरोषहुंकारं)

जनकहतकएषस्वैरमन्यद्ददातु
स्वमतनुतनुवैततत्परोऽप्याददातु ।
मदभिलषितवस्तुप्रार्थने पद्मजोऽपि
प्रभवति न हि कोऽन्यश्चिन्तयेच्चेतसाऽऽपि ॥

(प्रियां प्रति.सविलम्बसमर्थनं)

कोदण्डच्युतकाण्डदण्डपटली संजीर्णपर्णैरित-
ग्रावग्रावभवत्कणात्करणवद्ब्रह्माण्डभाण्डोदरः ।
विक्रम्यैव पतत्रिराडिव सुधां त्वामाहरेयंक्षणा-
दादावन्त्यमुपायमाहुरवमं तत्सामभूमेष्यते ॥

(सनिदर्शनाश्वासनं)

मन्थक्ष्माधरमथ्यमानकलशाऽऽकूपारमध्यस्थली
निर्यद्रत्नगजाश्वलोकजननी कल्पद्रुकादम्बरीः ।
सन्धीभूयममेदमित्यपहरत्स्वास्कन्ध देवासुरे-
ष्वैच्छत्स्वच्छतरां न कोऽपि हि कलां चान्द्री विना
स्थाणुना॥

(इति परस्परं परिरभ्य चिरं सुखातिशयमभिनयतः)

बुद्धिमती– अव्अ महाराअ बाहुबंधं सिहिलीकदुअ गच्छि अदु पुणोदं सणाएव्वि सादरं विरहकादरं सपेस अ दइजणं ।

[आर्य ! महाराज ! बाहुबन्धं शिथिलीकृत्य, गम्यतां पुनर्दर्शनायेति सादरं विरहकातरं सम्प्रेषय दयितजनम् ।]

राजा –(आत्मगतं)

ईशोऽपि सकलस्याहं अनीशोऽस्मि भुजौ प्रति ।
मुमुक्षोरपि मे यत्तौ न किञ्चिदपि मुञ्चतः ॥

(हृदयमवलोक्य)

नेत्राम्बु बिन्दुसंसिक्तं कुचसंव्यानपल्लवम् ।
सुधाविलेपनमभूत् प्रेयस्या मम वक्षसोः ॥

[प्रकाशं]

इदानीं प्रेषयामि । (गाढमालिङ्गन्नेव) सुमुखि ! गम्यतां पुनर्दर्शनाय ।

चन्द्रिका – सहि गव्तूण आ अच्छं मिव्ति आमतेहि सरसमनसं प्रिअजणं ।
[सखि ! गत्वाऽऽगच्छामीत्यामन्त्र्य सरसमनसं प्रियजनम् ।]

कलावती – (स्वगतं)
गव्तूणोव्ति विवव्खा मे अव्थि वा अ पुणोपुणो ।
आअव्धंमिव्ति वदइ सुमरेइ णतं पदं ॥
[गत्वा इति विवक्षा मे अस्ति वाचा पुनः पुनः ।
आगच्छामीति वदति स्मरति न तत्पदम् ॥]

[प्रकाशं]

(गत्वेति पदमनुक्त्वैव स बाष्पकण्ठमाननमीषदुन्नमय्य, मन्दाक्षेण मन्दीकृताक्षमुद्वीक्ष्य)
अव्अ उव्त आअव्छंमि ।
[आर्यपुत्र ! आगच्छामि]

चन्द्रिका – (अपवार्य) एसो भुअबंधं अविमुंचंतो एव्व पुणो पुणो गव्मि अदु पुणो दंसणाएव्ति सदअं वदइ । एसा उण गव्तूणपदं मुव्तूणव्व अअ उव्त आअव्छं मिव्ति जव्पइ तदो गाढंउव्मव्थ उव्कंठाणं आकव्पं एव्वं अवव्थाणेवि सुहालेवेण संखसिदाणं विअ द्रण्ठआजं पेव्मपरेण संघटिदाणं

एदाणं विओअ णिव्वेदो दुन्भेदो ता पसहिअ विघडणं करव्य ।

[एष भुजबन्धमविमुञ्चन्नेव पुनः पुनः "गम्यतां पुनर्दर्शनाय" इति सदयं वदति । एषा पुनर्गत्वेति पदमुक्त्वैव आर्यपुत्र ! आगच्छामीति जल्पति । ततो गाढमुन्मस्तकोत्कण्ठयोराकल्प-मेवमवस्थानेऽपि सुधालेपेन संरूषितयो-रिवेष्टकयोः प्रेमभरेण सङ्घटितयोरेतयोर्वियोग-निर्वेदो दुर्भेदस्तस्मात्प्रसह्य विघटनं कुर्वः ।]

[नेपथ्ये]

(पुनस्तदेव पठति)

(सर्वे ससम्भ्रममाकर्णयन्ति)

बुद्धिमती - महाराअ अग्गेचिट्ठइ कज्जगौरवं ।

[महाराज ! अग्रे तिष्ठति कार्यगौरवं]

(इति बाहुबन्धं शिथिलयति)

चन्द्रिका - सहि अंबातुवरेइ ।

[सखि ! अम्ब ! त्वरयति ।]

(इति मन्दमाकृष्यापसारयति)

राजा - (सव्यथं) जलदसकलावृते नभसि कियच्चिरं शशिकलावलोकनम् । बुद्धिमति ! तव सख्या समाश्वासनाय समाश्रंय चन्द्रिकाम् ।

बुद्धिमती - जं देवो आणवेदि । [यद्देव ! आज्ञापयति ।]

कलावती - (स्वगतं) पराहीणंस जणंस कुदो सच्छंददो विहलणं ।

[पराधीनस्य जनस्य कुतः स्वच्छन्दतो विहरणम् ।]

[प्रकाशं]

सहि अंवाए भोअणवेला आदिक्कमदि तदो झन्ति गच्छंम ।

[सखि ! मातुर्भोजनवेला अतिक्रामति, ततो झटिति गच्छामः ।]

(इति चन्द्रिकाबुद्धिमतीभ्यां दत्तहस्तावलम्बं सव्याजं विलम्ब्य पुनः पुनः प्रतिनिवृत्य पश्यन्ती निष्क्रान्ता)

राजा - (आदृष्टिपातमवलोक्य) हन्त ! हन्त

चित्तं पुरैव सक्तं
दृष्टेःकृष्टतयाद्यशक्तिरपि ।
नपरिच्छेदव्यक्ति-
र्नयने जाग्रति पुरस्थिते विषये ॥

(विमृश्य, सहेतुकथनं)

सूर्याचन्द्रमसौ चेदस्तं यातौ ततोन्धकार इति ।
यत्तन्मिथ्याकान्ता विश्लेषे स इति जानामि ॥

इदमति विचित्रम् । यदिदानीं

तमोऽनुदामभावतस्तमःपरं दृशोर्भवे-
त्प्रियावियोगसम्भवस्सहान्धकारसंहतिः ।

श्रुतिं दृशं बत ! त्वचं तथैव द्वैवनासिकां
मनोरसज्ञतापदं तिरस्करोति चेन्द्रियम् ॥

(क्षणं विषयग्रहणवैधुर्यमभिनीय, समनःक्षोभं)

को देशः कः समयः किन्वेतत्कार्यमन्ततः कोऽहम् ।
न ज्ञातमियद्विदानीं व्यामोहः कोपमापतितः ॥

(समानसाश्वासनं)

शोचन्तु विषयहान्या करणान्यपराणि तद्युक्तम् ।
अवियुक्तं हि तया त्वं मानस कस्ते परितापः ॥

(घ्राणमभिनीय)

क्षणिकत्वसम्पत्तेः कश्चित्कालं स्थिरैव तद्विकृतिः ।
आश्लेषे विनिवृत्ते तत्सङ्क्रान्तः परीमलस्थेयान् ॥

(सर्वतोऽवलोक्य, सानुशयं)

पूजास्थानमिदं प्रसूनहरणोद्देशोऽयमेतत्स्थलं
चित्रीकृत्य निवेशितस्य धुरि मे तस्या इहैवासिका ।
छद्मालिङ्गनपूर्वकं निशमनं कान्ताशयस्यादरा-
दत्रेतिव्यतिषक्तलोचनतया चित्तं मम भ्राम्यति ॥

(पत्रमविषयप्रियानुभवसुखमभिनीय)

एकैव सा तदानीं पुरतः पश्चाच्च सर्वत्र ।
नैका भवतीदानीं श्रेयान्योगाद्वियोगो नः ॥

(विचिन्त्य, सखेदं)

संयुज्य वियुज्य झटितिसंयोगश्चेत्स एव संयोगः ।
नाद्यो नान्त्यश्च चिरादचिरात्कथमेव संभवतु ॥

(इत्युक्त्वा क्रमेण परिक्रामति)

(मणिशेखरविदूषकौ राजान्तिकमुपसर्पतः)

राजा – (तावनालोक्य)

तामेव तामरसपत्रविशालनेत्रा-
माकालिकीमिव तटिल्लतिकामहीस्थाम् ।
उत्कण्ठितं मम मनस्त्वरते नितान्तं
द्रष्टुं पुनःपुनरनङ्गशरार्दितस्य ॥

(सस्पृहं)

पुष्पापचाय विधिकेलिषु पक्ष्मलाक्ष्य
लाक्षारसार्द्रपदपल्लवलाञ्छितानि ।
धन्यानि कीर्णकुसुमोत्करसैकतानि
पश्यामि तानि ललितोपवनान्तराणि ॥

(साश्चर्यं)

सन्तु नाम सकलाश्च विभ्रमाः
दूरतो धरणिभृत्सुतामणेः ।
वीक्षितं चपलमेकमप्यलं
हृद्गजस्य निगलं निरन्तरम् ॥

विदूषकः – भो वअं. स चिरं अणुभूदपिअ स मा अमसुहो वि किं एव्वं आदिचबोसि । ओसहसेवणेवि गदो दुअणिकिदो ।

[भो ! वयस्य चिरमनुभूतप्रियासमागमसुखोऽपि किमेवमतिचपलोऽसि । औषधसेवनेऽपि गदो द्विगुणीकृतः ।]

राजा - (अनाकर्णितकेन)

कदा वा तत्तादृङ् नवतरुणिमाभ्युन्नतिवशा-
दुदञ्चद्वक्षोजस्तबकमतिचारूरुजघनम् ।
स्मरस्मैरस्मेराननकमललोलालकभरं
वपुस्तस्या मुग्धं पुनरपि पुरःस्थास्यति मम ॥

मणिशेखरः - (स्वगतं) कथमयमेवमतिवेलप्रेमानुबन्धः प्रकृतिं प्रपत्स्यते । कथं वा कर्तव्यभारनिर्वहणम् । भवतु ! पृच्छामि ।

[प्रकाशं]

महाराज ! केयमदृष्टपूर्वा चित्तविकृतिः । विधेयं सर्वं मनसि निधेयम् । सेव्यजनमपहाय क्वनु गता बुद्धिमती ।

राजा - (क्षणं स्तब्ध इव स्थित्वा, सधैर्यावष्टम्भं) मणिशेखरविश्लेषकातरायाः प्रियायाः समाश्वासनाय चन्द्रिका साधर्म्यमुपागता ।

विदूषकः - अहो बुद्धिमदीए सोहग्गं जं कलावदीए दपिद परिआरिएव्वि वसण भोअण गंधमल्ले हिं पंचविहेहिं अव्भवहारिएहिं असमाइदा सुहं वसइ अहं उणचिरादो सव्वाहिसारेण हव्वंपव्वं तेव्वूणअव्णेसणसमं मूढकिव्वं उरीकदुअ मुव्वाहा-रवव्तव्समअणाणलतव्तगव्तव्स एव्वमुव्मव्तचिव्तंस तुव्झ वअव्सदाए रिव्तोदर गंडो जिविदसंसअं संपव्तो मिअबंधिणी पिणव्धपादो मिअ पोदो विअ भमामि ।

[अहो बुद्धिमत्याः सौभाग्यं यत्कलावत्या दयित परिचारिकेति वसनभोजन गन्धमाल्यैः पञ्चविधैरभ्यवहार्यैश्च स भाजिता सुखं वसति । अहं पुनश्चिरात्मनोभिसारेण हस्तप्राप्तं त्यक्त्वान्वेषणश्रमं मूछकृत्यमूरीकृत्यगुक्ताहार-वार्तस्य मदनानलतप्तगात्रस्य एवमुन्मत्तचित्तस्य तव वयस्यतया रिक्तोदरगर्तो जीवितसंशयं प्राप्तो मृगबन्धिनी पिनद्धपादो मृगपोत इव भ्रमामि ।]

मणिशेखरः – (विदूषकमङ्गुल्या परितर्ज्य, स्वगतं) अदृष्टदयिताव्यापारापारपारावारपरपारतया निमज्जदुन्मज्जदंतरमेनमेतदन्तरलाभेन प्रतिश्रुत-कार्यनिर्वाहलाभेन च प्रकृतिं प्रापयामि ।

(प्रकाशं)

अद्य ते विद्यते कार्यान्तरं प्रदेशेनेहायमने हात्ततपोधनतया भ्रूभङ्गव्यतिषङ्गमात्रेण त्रिजगती-भेदिनस्त्रिकालवेदिनः प्रार्थितार्थसमर्थनाय ।

राजा – (स्मरणमभिनीय, स श्लाघं)
साधु ! मणिशेखर ! साधु ! समये स्मारितवानसि । स नाम वयं नाम समीहितसमर्थनं, नकिञ्चिदेतत् ।

किन्तु –

अनिष्टं स्रष्टादेरपि भुवनसृष्टिं कलयितुं
समर्थेन स्वार्थं दशरथजनिर्गाधिजरुषा ।
समानीतः कीर्तिं क्षितिदुहितृमूर्तिं च गतवान्
स एष ज्या योऽस्मास्वविकलमकस्मान्निपतते ॥

ततश्च यावद्देवसेनः समुपसीदति, यावद्धा चतुरङ्गिणीसेना तावदेव ।

प्रथमं प्रतिश्रुतत्वात्पश्चास्यं पश्चतां जेतुम् ।
सन्निहितमुनिवेरण्यं यामो यमुनातटारण्यम् ॥

(साञ्जलिबन्धं)

शिवं प्रयच्छन्भक्तेभ्यः शिवात्मा शिवविग्रहः ।
शिवोपगूढः सततं शिवो भूयाच्छिवङ्करः ॥

[इति निष्क्रान्तास्सर्वे]

॥ द्वितीयोऽङ्कः समाप्तः ॥

॥ तृतीयोऽङ्कः ॥

[ततः प्रविशतस्तापसौ]

एकः – सखे ! पर्णाशन !

जीवन्तं पुरुषं चिरादुपनमेदानन्द इत्यञ्जसा
गाथा सम्प्रति हन्त यन्निरवधेःपारीन्द्रबाधाम्बुधेः ।
यावत्तारयति स्वयंकुलपतिस्त्रस्तान्समस्तान्मुनी-
नानीय प्रतिनन्द्य नन्दकनृपं त्वौदार्यशौर्योदधिम् ॥

अन्यः– (साशङ्कं)

उद्विग्ना निनदेन केऽपि मथनायाताः प्रयाताः पुरा
भग्ना दृष्टिभये समेत्य विपिनं तन्मध्यमध्यासते ।
भग्नाश्चापतितेन तेन कतिचिद्भुक्ता विमुक्तासवो
लग्नास्त्रेण बतामुना कथमसौ हन्येत मन्येत कः ॥

पर्णाशनः – सखे ! वाताशन ! मैवं मंस्थाः ।

किन्तु –

गाधिज इव दाशरथिं
बाधितुमात्मीय यज्ञविघ्नकरान् ।
केसरिणं हन्तुमयं
नृपकेसरिणं समानयामास ॥

अन्यथा – शृण्वतामतिशक्रविक्रमे नृपसार्वभौमे पराक्रमराहित्यं भूतभविष्यद्वर्तमानवस्तुविज्ञान वैज्ञानिके मुनिनायके जाल्मता च प्रतिभायात् ।

वाताशनः –(सवैक्लब्यं) सन्ततचिन्तितपञ्चाननोदञ्चित वञ्चनप्रपञ्चतया ।

दुर्निग्राहयुदाग्रहग्रहमतिव्यग्रोग्रकक्षस्थली
जीवग्राहगृहीतविग्रहदशग्रीवाग्रजोन्निग्रहे ।
सुग्रीवेण खराहिते जनकजाजानाविवास्मिन्नृपे
हर्यक्षक्षपणे मया विरचितः शङ्काकलङ्काङ्कुरः ॥

पर्णाशनः – अहं तु शश्वदनुभूतनन्दकमहाराज शौर्यतया भाविकार्यं वर्तमानतया जानामि ।

तथाहि –

हर्यक्षे क्षपिते तपस्विबटवस्वच्छन्दसञ्चारिणः
पुष्पैधःफलमूलहारपटवो वन्यासुवन्यामृगाः ।
आतिथ्यं लभते तिथिश्च गतभीर्गत्वांश्रमादाश्रमं
कालङ्कालमनुत्सृजन्मुनिजनः कर्माणि निर्माति च ॥

वाताशनः – (परितो विलोक्य, साश्चर्यं) सखे ! पश्य !
नीशारायित सान्द्रतातिविलसत्किञ्जल्कभृत्कर्णिका
शय्याप्रान्तदलावलीपटकुटीछन्नाब्जगर्भाङ्कणे ।
रात्रीं प्रातरिहालिनीभिरलिनः सुप्त्वा सुखं जाग्रतः
प्रेमार्द्रीणि विडम्बयन्ति मिथुनान्यैश्वर्यवन्तिस्फुटम् ॥

पर्णाशनः –सखे ! पुरतो दृश्यतामियम् ।
मन्दस्यन्दसमीरलोलजलजप्रत्यग्रडोलाक्रिया
मन्दानन्दमिलिन्दबृन्दनिनदस्तोकप्रबुद्धाण्डजा ।
वानीरद्रु निकुञ्जसुप्तसबरी वक्षोजकुम्भोद्भवं
न्नित्यासंजित चक्रवाकमिथुनभ्रान्तिः कलिन्दात्मजा ॥

वाताशनः –अलमलं कालक्षिपया । कुत्र सम्प्रति सराजकेसरी ?

पर्णाशनः – (परितो विलोक्य, सहर्षं) यमुनातटान्निर्गत्य मितानुप्लवः, सिंहोपप्लवविप्लवाय विधाय सन्नाहं पुरोधाय कुलपति मयमितएवाऽऽभिवर्तते । तदावामपि दर विकचपुण्डरीक षण्डपरिमल-परिमिलन्मिलिन्दजारवसंकुले कलिन्दजाजले सान्ध्यं कर्म सर्वन्निर्वर्त्य नन्दकमहाराजेन घातिष्यमाणमृगराजं मुनिराजमनुसरावः ।

[इति निष्क्रान्तौ

[अङ्कास्यम्]

[ततः प्रविशति यथा निर्दिष्टो राजा]

राजा – अये विभातप्रायैव विभावरी ।

अर्धोन्मीलत्कमलकलिका निर्भरा भेदगर्भा
वाताशीता हिमकुणवहा वान्ति भृङ्गानुयाताः
स्फीयन्ते द्रागरुणकिरणालीढगाढान्धकारा-
स्तारकामं तलिनमहसः सान्ध्यभासा भवन्ति ॥

(सविस्मयं)

द्विजराजमवेक्ष्य पौरुहूती हरिदासेवित वारुणीकमेनम् ।
दरजातनिजावदात भावच्छलतः स्मेरमुखीव दृश्यतेऽसौ ॥

(सकौतुकं)

कलिन्दकन्यापुलिनान्तरालमिलन्मरालीकछगास्तनोति ।
समुन्मिषत्तामरसप्रवेश परेन्दिरा हंसकनादशङ्काम् ॥

मणिशेखरः – महाराज ! पुरो दीयतां दृष्टिः ।

दरविकचदलेषु पङ्कजाना-
मियमुदरेषु मुहुर्मुहुर्भ्रमन्ती ।
मधुकरपटली विभाति भानोः
करदलिता तिमिरावलीव लीना ॥

त्रिकालवेदी – (सानन्दं)

तटभुवियमुनायास्तापसानां कुलेषु
श्रुतिशिखरवचांसि छात्रबृन्दोदितानि ।
तरुविटपकुलायोड्डीनहेलाविलापा
त्पतगगरुदुदीतछीत्क्रियाभिःप्रथन्ते ॥

राजा – (विलोक्य, सनिर्वेदं, स्वगतं)

मलिनतरुकलङ्कं मण्डलं पाण्डुरश्मे-
र्गलितकिरणजालं गर्भितार्कप्रभाभिः ।
वदनकमलमीषद्भ्रान्तनेत्राम्बुसिक्तं
स्मरणशरणहासं स्मारयत्यद्य तन्व्याः ॥

हन्त ! हन्त !

प्रेयस्यावदनद्युतिं कलयतां पद्मे मनश्राव्यतां
सल्लापस्य पिकध्वनौ सुमनसामामोदगर्भेऽनिले ।
निःश्वासस्य परीमलें मधुरसे माधुर्यमोष्ठस्य च
कापि स्पर्शसुखं लभेत न परीरम्भं तदीयं विना ॥

[प्रकाशं]

दिक्कान्ताकुचकुम्भकुंकुमरतस्सन्दोहसन्देहदाः
किन्त्वेते गगनाङ्गणार्णवतटी नव्यप्रवालाङ्कुराः ।

खेलन्त्या दिवसश्रियस्त इतः पादाब्जलाक्षाप्रभा
धाम्नामुज्जिहते गणादिनमणेः पूर्वाचलाभ्यन्तरात् ॥

मणिशेखरः –

उदपत्य हिमांशुविम्बमेत-
त्कुरुविन्दोपलदर्पणाभमुर्व्या ।
अतिसुन्दरमिन्द्रदिग्रमण्या
नवकाश्मीरमयं तमालपत्रम् ॥

त्रिकालवेदी –

कलिन्दगिरिकन्दरादिहविनिर्गता दुर्गमा
द्विषोल्बणतया फणिन्यसित पङ्कजाभाकृतिः ।
विलोढिकलुषाभिधान्यवनपोतकात्प्राणिनां
तरङ्गततिजिह्वया शमनसोदरी नामिका ॥

राजा – (साकूतं)

नवकुवलयनेत्रा सैकतश्रोणिबिम्बा
विकसितजलजास्या चक्रवाकस्तनाढ्या ।
घनविलसितवेणी घर्मरश्मेस्तनूजा
प्रियमुपसरतीयं पिरस्फुरत्फेनहासा ॥

किञ्च–

कुरङ्गमन्दकर्दमैः कुहचिदङ्कितेवाधिकं
क्वचिन्मरकतोपलैः कलितभूषणे वाऽऽन्यतः ।
व्रजैरिव वृताकृतिर्विकचमेचकाब्जस्रजां
परत्र यमुनाधृतां जनविलोचनैवेक्ष्यते ॥

(सस्मरणं, आत्मगतं)

श्रवणचुलुकपेयैः श्राव्यभावाद्भिरावैः-
कमलमधिशयानं राजहंसीव कान्तम् ।
सुतनुरपि कदा मां बोधयिष्यत्यनङ्गः-
प्रसृमरशरतार्द्रां मञ्जुमञ्जीरघोषैः ॥

[प्रकाशं]

(सर्वतो दृष्टिं प्रसार्य साश्चर्यं)

अरण्यान्यामभ्रङ्कषविटपिझाटप्रघटना-
दसूर्यं पश्यानां गिरितटभुवां द्योतनमिव ।
विधातुं व्याकीर्णैर्दिशिदिदिशि फणारत्नकिरणैः-
क्षणादुन्मज्जन्ति स्फुटसुषिरवक्त्राद्विषधराः ॥

मणिशेखर ! इतोऽपि पश्य ! तावत् ।

अविरलदलभाजामन्तरालैस्तरूणा-
मनिलतरलितानामापतन्मन्दमन्दम् ।
हिमरुच इव रोचिर्मण्डलं चण्डभानो-
र्निबिडजडिमयोगान्निर्गतोष्मप्रसङ्गम् ॥

मणिशेखरः -(सोत्कम्पं)

आयामिन्यां शिलायामपगतकरुणाः क्रन्दतो मन्दसत्वान्
ग्राहं ग्राहं किराताश्रवणकदुरवैर्भीषयन्तोऽतिवेगात् ।
दाहं दाहं प्रदीप्ते हुतभुजि यमुनाभ्रातृभृत्या इवैते
पेषं पेषं कराग्रैः सममतिशकलीकृत्य हाहा ग्रसन्ति ॥

(अन्यतो निर्वर्ण्य)

करकलितकृपाणं प्रेक्ष्य दूराद्भवन्तं
भिदुरकरमिवेन्द्रं नीलशैलाश्चलन्तः ।

भयपरवशचित्ताः क्वापि लीयंत एते
नृपवर ! किरिसंघा निर्मदाश्शर्महीनाः ॥

(वामतो निरूप्य)

विद्राव्यदुर्बलमृगान् बलिभिर्लुलायै-
स्तालीफलोपमिततारकमीक्षमाणैः ।
उल्लिख्यतेऽश्मनि विषाणशिरःस शब्दं
कण्डूषखण्डनमिवाकलयद्भिरस्य ॥

(उपरि दृष्ट्वा, सहासं)

आप्लुतिभिरागमशिखरे
विटपविलग्नान् विहंगमान्कपयः ।
उच्चाटयन्ति चटुलं-
मिथुनीभावं भजन्ति चान्योऽन्यम् ॥

राजा – अतिभीषणमग्रतो वर्तते ।

सम्भ्राम्यद्भीषणाक्षैश्चलतर रसनं सृक्कणी संलिहामै-
रास्यैर्दंष्ट्रांकरालैर्विवृतबिलसमैरुद्धिरन्तस्फुलिङ्गान् ।
शार्दूलामर्दनाय स्फुटविकटनखश्रेणिभिःकूणिताभि-
स्तब्धोत्तानात्मवाला वनभुविचरतां रोहितास्या यतन्ते ॥

(पदान्तरं गत्वा, सहासं)

वालामलिनमुखानामतिदीर्घा विटपमध्यनिर्याताः ।
नकुलकुलैर्भूःझटित्याकृष्यन्ते हन्त ! हन्त ! भूमिष्ठैः ॥

मणिशेखरः – (सभयं)

मदावलरताहतिस्फुटितसिन्धुरोऽधोन्तरं
दरीमुखदरोन्मुखी भवदभीतसिह्मव्रजम् ।

हठागतमृगादनक्षणविलोकनोद्यद्भय-
द्रवद्रुरुगणाकुलं विपिनमेतदालोक्यते ॥

किञ्च -

सिंहव्याघ्रव्रातनखाग्रव्यतिविद्धै-
र्नागैरेणैराचितभूमीतलमेव ।
वेणीश्लिष्यद्भोगिभुजङ्गीकुलमारा-
दुच्चानेकानोकहवन्मत्तमयूरम् ॥

त्रिकालवेदी - दुष्टसत्वावनमेतद्धनं प्रवेष्टव्यमस्माभिः ।

राजा - सज्जीबुभूषति ।

विदूषकः - (सविषादं) व अं स एदंस कवडतावसव्स विदिदं ववसिदं । कव्सवि देवदाविसेसव्सस णरवलिं कादुकामो वव्धादि दुव्डसन्तबहुलं गहणं णो णुणं णिणीसदि तदो । झत्ति पडिणिवत्तिदव्वं ।
[वयस्य ! एतस्य कपटतापसस्य विदितं व्यवसितम् । कस्यापि देवताविशेषस्य नरबलिं कर्तुकामो व्याघ्रादि दुष्टसत्वबहुलं गगनं नो नूनं निनीषति । ततः झटिति प्रतिनिवर्तितव्यम् ।]

त्रिकालवेदी - साधरस्फुरणं दृशा वर्णयति ।

राजा - कष्टमनिष्टोद्भावनस्वभावं खलु भीरुजनहृदयम् ।
(विदूषकं प्रति) धिग्वैधेय किं प्रलपसि ?
(मुनिं प्रति, सप्रश्रयं) भगवन् । न श्राव्यमविवेकि वचनम् ।
कतरःकान्तारपथः ।

त्रिकालवेदी – अहं पुरस्सरो भवामि मार्गप्रदर्शनाय ।

(सर्वे वनप्रवेशमभिनयन्ति)

राजा – (सव्यथमात्मगतं)

बर्बूरद्रुगतैश्शिरस्त्रसहितं कंकंटकैस्तुद्यते
सोपानच्चरणं क्षुराग्रनिशितैःपाषाणखण्डाश्चलैः ।
ईषन्नव्यथयत्पदं प्रियतमा विश्लेषकालोन्मिष-
द्रन्ध्रान्वेषि मनोभवाशुगपरिक्षुण्णान्तरङ्गस्य मे ॥

(प्रकाशं)

(ससन्नाहं)

धुन्वन्तः केसराणां विधुधवलरुचामावलिं स्तम्भिताग्रां
दंष्ट्रान्तान् दर्शयन्तः क्षतजशबलितान् जृम्भया व्यात्तवक्त्राः ।
परिन्द्राः रोषसान्द्राः कबलितकरटिं व्यूहदर्पातिरेकाः
निस्सर्पन्ति प्रसर्पत्परमृगनिकराः सर्वतः पर्वताग्रात् ॥

(सलीलं धनुषि शरं सन्धाय) मुनीन्द्रमृगेन्द्राः किमिमे व्यापादनीयाः ।

त्रिकालवेदी – किमेतैः प्राकृतैः ?

राजा –अक्षिगतः क्वनु तर्हि सहर्यक्षः कदास्माक-
मक्षिगतो भविष्यति ।

त्रिकालवेदी – अयमेव तस्या गमनसमयः ।

(परितो दृष्ट्वा)

नूनमयं करिरिपुरंदूर एव निबिडतरतरुतलनि-
कुञ्जपुञ्जव्यवहितवपुर्विहरति ।

यत्कोपदीप्रनयन ज्वालां दृष्ट्वा द्रवन्त्यमी दूरात् ।
शलभा इवेभकलभाः शरभा अपि सुलभा साध्वसाः परितः ॥

विदूषकः – विरुद्धो खु एसो उवव्णासो जंकेसरिभआदो सरहा ओपला अंतेव्ति ।
[विरुद्धः खल्वेष उपन्यासः । यत्केसरिभयात् शरभाः पलायन्त इति ।]

मणिशेखरः– न कश्चिदप्यत्र विरोधः । न हि चिन्तावकाशोऽयं तेजस्विन्युपपद्यते । क्वचित्क्वचिन्मनुष्येण राक्षसः किं न हन्यते ।

त्रिकालवेदी – (साङ्गुलिनिर्देशं)

नखाग्रपरिघट्टनंत्रुटितगण्डशैलावलिः-
कठोरतरपीट्कृतिः श्रुतिवितीर्णकर्णज्वरः ।
जटापटलवीक्षणक्षुभितदूरधावत्करी
दरीग्रहमुखादभीर्निकटमेति नःकेसरी ॥

अयमेव समुदञ्चितवञ्चनाप्रपञ्चः पञ्चाननः पञ्चतां प्रापणीयः ।

राजा –(सधैर्यावष्टम्भं) तत्क्षणमेव प्रक्ष्वेडनस्य हर्यक्षं लक्षीकरोति ।

[नेपथ्ये]

(आश्चर्यं)

यद्भीत्या न बभूवुराश्रममृगाः स्वच्छन्दसञ्चारिणः-
कालेष्वेव समाचरन्तमुनयस्तास्ताःक्रिया वैदिकीः ।

आतन्वन्मृगया परा अपि नतामस्मिन्वने क्षत्रियाः-
सोऽयं नन्दकभूभृतामृगपतिर्नीतःकथं पञ्चताम् ॥

(पुनस्तत्रैव)

मृगपतिवधतुष्टैर्मुक्तिचर्याविशिष्टै-
र्मुनिभिरभिहिताभिर्वाग्भिराशीर्युताभिः ।
निरुपमभुजशक्तेः र्नित्यमुर्वीपतीन्दो-
र्समभिलषितसिद्धिस्सप्रसिद्धिस्तवास्तु ॥

(सर्वे सपरितोषमाकर्णयन्ति)

त्रिकालवेदी - (मुहूर्तमात्रमानन्दातिशयमभिनीय)
महाराज ! तवैवोचितमेतादृशं चरितम् ।
यत्तपश्चर्याकृतमुखानामस्मादृशामन्तर्मुखानां
हृदयममन्दमविन्दतानन्दम् ।

राजा - (सविनयव्रीडं)
अवरोपयितुं भुवं सुरान् दिवमारोपयितुं नरानपि ।
कृतिनस्तवसिह्मसंहृतौ कियती राम्प्रति किङ्करे स्तुतिः॥

मणिशेखरः - निहतस्याप्यस्य मृगराज हतकस्य कथ-
मद्यापि भयजनकता ।

यतः -

भिदुरसमधुराणां गाढपाताचराणां
दलितहृदयमार्गाभिर्गते जीवितेऽपि ।
अधिमृगपतिकायं हन्त ! रोम्णां निकायं
पवनविचलिताग्रं प्रेक्ष्यनागाद्द्रवन्ति ॥

(अन्यतोऽवलोक्य)

क्रीडानिरूढमनसः कतिचित्कपोल
लोलन्मधुव्रतकुलं करकर्षणेन ।
आनन्दयन्ति शनकैरपनीतसिह्म
शङ्काङ्कुराः वनगजाश्चटुलं करेणुः ॥

एकस्मादपि वस्तुनः कथमेकजातीयानामेकदैव-विरुद्धकार्यसम्भवः ।

राजा – युक्तमेवैतत् ।

तत्तादृशोऽपि निधनं गतवत्यमीषां
पञ्चाननान्वयमणौ वनकुञ्जराणाम् ।
केषाञ्चिदुन्मिषति विश्वसनं परेषां
तद्रिक्तता भवति साध्वसतारतम्यात् ॥

त्रिकालवेदी – (सप्रमोदं, इदानीं दुष्टजन्तुवधपरितुष्ट-मृषिसमवायमवलोक्य) वयमपि सम्मदभर-भरितान्तराभवामः ।

मणिशेखरः – भगवन् ! किमतिक्रान्ता वनदुर्गसीमानः? किं वा सन्निहितः सरत्नकूटगिरिः ।

त्रिकालवेदी – (पुरतः साङ्गुलिनिर्देशं) विनिवृत्त विपिन-विहारकौतूहलैर्भवद्भिरवधातव्यम् ।

विविधमणिघृणीनां वीचिकाभिस्समन्ता-
द्धुरिहरिदबलानां क्लृप्तचित्रांशुकश्रीः ।

परिहसितविडौजो राजधानी विलासः
कनकरुचिरकूटः काशते रत्नकूटः ॥

मणिशेखरः - (आमूलाग्रं विभाव्य, सखेदं)

अमुच्छ्रायतया सा-
वभित्तःकामं च निरवलम्बतया ।
पङ्गूनामिव विटपी-
पर्वतराजःपरं दुरारोहः ॥

त्रिकालवेदी - (विहस्य) न किञ्चिदेतत् । निमीलिताक्षान् वः क्षणेन प्रापयामि विद्याबलेन क्षितिधरवरम् ।

[आकाशे - यूयमिन्द्रसखकन्यया साकमिमं गिरिवर-मारोक्ष्यथ]

(सर्वे साद्भुतमाकर्णयन्ति)

मणिशेखरः- कथमियमशरीरिणी वाणी महाराजस्य राजकन्यापरिणयं सिद्धप्रायं ब्रवीति ।

त्रिकालवेदी - (निमीलितनयनं क्षणमात्रं ध्यानमभिनीय सहर्षस्मितम्) सत्यैव नित्यं गगनवाणी महाराजस्य ढिल्लीपतिसुता परिणीतिरवश्यं भाविनी । तत्र मयापि सन्निधास्यते । तदद्यास्माकमनवसरप्राप्तमचलाधिरोहणम् ।

राजा - (सकौतुकमात्मगतं)

यन्निश्चितं राजसुताकरग्रहणमङ्गलम् ।
तदाम्रेडितमाकाशवाचा मुनिगिराऽऽपि च ॥

(प्रकाशम्)

अयमेव ढिल्लीनगरप्रहितस्य देवसेनस्य समागम-समयस्ततस्तत्र प्रस्थातव्यमस्माभिः ।

त्रिकालवेदी – तर्हि समीहितसाधनाय सत्वरं साधय !

(इति निष्क्रान्तास्सर्वे)

॥ तृतीयोऽङ्कः समाप्तः ॥

श्रीः

।। चतुर्थोऽङ्कः ।।

[नेपथ्ये]

(न भेतव्यम्, ततः प्रविशत्यभयवचनमाकर्णयन् सभ्रांन्तो विप्रवटुः)

विप्रवटुः – (सभयकम्पं दिशोऽवलोक्य)

ण भेदव्वं ण भेदव्वं ति जो वा को वा कुव्थ वाहरइ। इमोदो भआदोतारिसो को मं रक्खिव्सदि। (विमृश्य) अइगम्भीरेण स्वरेण पुरोहिद पुत्त ओ मेत्त ओविअपडिभाइ ।

[ने भेतव्यं न भेतव्यमिति यो वा को वा कुत्र व्याहरति । एतस्माद्भयात्तादृशः को मां रक्षिष्यति । (विमृश्य) अतिगम्भीरेण स्वरेण पुरोहितपुत्रको मैत्रक इव प्रतिभाति ।]

(निपुणं निध्याय, सपरितोषं)

सो एव्वमहसंमुहमायछइ ।

[स एव मम सम्मुखं आगच्छति]

[प्रविश्य]

मैत्रकः – चारणक ! न भेतव्यम् । इत एह्येहि ।

राष्ट्रोपप्लवविप्लवाय जगतीनाथेन सङ्ख्यावताः-
साङ्गाम्नायविदग्रणीरनुकलं सम्पूजितो मे गुरुः ।
मय्यारोपित शान्तिपुष्टिरचनाभारस्वयं कौतुकी
साचिव्यं प्रकटीकरोति निपुणं कालेषु संसद्गतः ॥

अवश्यमेतर्हि शान्तिकेन पौष्टिकेन वा विधिना भवितव्यम् । एतावन्तं कालं किं विलम्बितम् । केनेदमाहितमत्याहितम् ।

चारणकः –(सरोमाञ्चं)

अव्अ मेत्तअ संफुल्लकमलपरिमलमिलन् मिलिन्दकलह कलकलबोलमुहरिद दसदिसाअं दिंडीरखण्डमण्डलपण्डरीकिदवेलाअं समुद्द- वल्लहाअं जउण्णासरिदाअं ण्हादुं गदो ताए एव्व तउ णिअड बोर वणब्भव्णे आदिवेल साअरसमलिं। विअ कव्सवि खि इवउणो वरूहिणिं पेव्खिअ ईरिसावव्थोग्नि संवुत्तो ।

[आर्य ! मैत्रक ! सम्फुल्लकमलपरिमलमिलन्मिलिन्द- कलभकलकलशब्द मुखरितदशदिशायांडिण्डीर- खण्ड मण्डलपाण्डरीकृतवेलायां समुद्रवल्लभायां यमुनासरिति स्नातुं गतस्तस्या एव तत निकट बदरवनाभ्यन्तरे अतिवेलसागरसमष्टिमिव कस्यापि क्षितिपतेर्वरूथिनीं प्रेक्ष्य ईदृशावस्थोऽस्मि संवृत्तः ।]

मैत्रकः – चारणक ! किं न जानासि राजकार्य गौरवम् ? शृणु ! तावत् ! करग्रहणकैतवादिमं देशमागत्य कन्याकरग्रहणमिच्छता नन्दकनृपतिनामुना- यमुनारोधसि निवेश्य विमतबल निरोधिनीं वरूथिनीं गच्छतां कन्यां पृच्छेति सन्दिष्ठः सेनानीर्देवसेनो नाम तत्क्षणमेव राजसभां प्रविष्ठः सादरमागमनकारणं राज्ञापृष्टः सावष्टम्भमिदमाचष्ट ।

चारणकः – (साशङ्कं) स अंवरं सअल खत्तिअ समअमुल्लंघिअ कण्णअं पत्थिदुं कहं देण दूतो पेसिदो चिट्ठदु एदं केरिसो तस्स संदेसो ।

[स्वयंवरं सकलक्षत्रियसमयमुल्लङ्घ्य कन्यकां प्रार्थयितुं कथं तेन दूतः प्रेषितः । तिष्ठत्वेतत् । कीदृशस्तस्य सन्देशः ।]

मैत्रकः –यदनवरतसेवासमागतपदावनतसकलसामन्त-राजस्य विभव तिरस्कृतराजराजस्य नन्दक-महाराजस्य जैत्रयात्रायां विहितविमतजनमनो विकृतौ भेरीभांकृतौ–

क्षुभ्यद्भिभ्यदुपोच्चलद्द्रुतपतत्क्रन्दल्लुठन्निश्वस
त्सीदात्स्विद्यदतिप्रमुह्यदचलज्ज्ञानद्रवत्कान्तया ।
दूरद्रावितसिह्मया शबरिका बन्दीग्रहव्यग्रया
संहत्या द्विषतां महाभयकरीभूभृद्दरी पूर्यते ॥

तन्न ! ते न विदितम् ।

चारणकः – किं ति दुस्सिलिट्ठक्कमं वअणमिदमभिहिदुं ।

[किमिति दुश्लिष्टक्रमं वचनमिदमभिहितम् ।

मैत्रकः – प्रबलावष्टंभ इति ।

चारणकः – ततस्ततः ।

मैत्रकः –इदमाहुरमात्यवृद्धाः ।

सद्वंशजाय जनकेन सुताप्रदेया–
तत्राप्यनन्तगुण एव वरो विचिन्त्यः ।

तस्मिंश्च तन्नयनसुन्दर एव मृग्य-
स्तत्सर्वमेकनिहितं ह्यपि किं विमृश्यम् ॥

असौ पुनर्महाराजसन्देशः ।

न शत्रुत्वं न मित्रत्वं जातिर्यस्याहितश्च यः ।
यस्य यश्च हितस्तौ तौ शत्रुमित्रे परस्परम् ॥
अतः कस्यापि शत्रुता मित्रता वा नाजानसिद्धा । अतः सर्वेणापि सर्वधा परस्परोपकारिणाभवितव्यम् ।

यदस्य मयि जागर्ति
निवर्तितसकलराजसत्वं करग्राहित्वम् ।
तदनीश्वरेण स्वयं
ईश्वरेणप्रतिपादितया दृढमधीश्वरतया ॥

अथवा-

अस्मदन्ववायजानां बाहुजानां सहाविर्भूतः
सम्राट्त्व-विभूतेरसीमभूम्ना ।

निष्कृष्टार्थस्तु-

वृतेषु वर्षेषु समीहितेषु-
वित्तेषु दत्तेष्वपि नैव तुष्टिः ।
अस्मिंस्तु देयं न परं हि वस्तु-
कन्याप्रदानात्करदत्तमस्तु ॥

चारणकः -(सभयकम्पं) किमाह भट्टा ।
[किमाह भर्ता ।]

मैत्रकः -

कन्याकरोश्रुतो दृष्टः कन्यायां वद शंससि ।
अन्योऽयं व्रियतां धीमन्नन्योऽन्यं सुखमास्यताम् ॥

चारणकः -(सश्लाघं) सहावामरिसिदेण परुसव्वता धरिसि देणवि भट्टिणा धीरोदत्तगुणोन्तरदाए जुत्तं एव्व पच्चुत्तं, तदो किमुन्त देण ।
[स्वभावमर्षितेन परुषवार्ताधर्षितेनापिभर्त्रा धीरोदात्त गुणोत्तरतया युक्तमेव प्रत्युक्तं ततः किमुक्तं तेन ।]

मैत्रकः -

परार्थ एव कन्यार्थःकिमर्थं तत्र शङ्कसे ।
पृष्टे तद्दानमिष्टं स्यादनिष्टं चेदतो व्यथा ॥

अप्रतिहतशासनस्य महाराजस्य सन्देशमवमन्वानः कं देशं समुपाश्रयेत् । सन्देष्टुमिच्छन्नित्यात्मसन्देहं समुपैष्यति । अलमुक्तिप्रत्युक्तिमालिकया । अवहितेन श्रूयतां राजसन्देशशेषः ।

यद्रत्नं चतुरर्णवीपरिवृते भूमण्डले यद्वशे-
त्तत्स्माज्झटिति स्वयं परिणमेदत्रेति जोघुष्यते ।
कन्यारत्नमनुत्तमं बत ! मया पृष्टेन देयं त्वया
नो चेत्पश्यसि रुक्मिणीपरिणयप्रादुष्कृतिर्भाविनी ॥

चारणकः-(सविषादं)अङ्कुरिदं कलहेन । तदोतदो ।
[अङ्कुरितं कलहेन । ततस्ततः।]

मैत्रकः - (तदाकर्ण्य) कर्णे रुन्धद्वचनं पश्यामि पश्यामीति (सावहित्थमभिधाय) याहि यहीति तं विसृज्य समितःकृते निर्याहि .निर्याहीति

वाहिनीशमादिश्य समितेः समुत्थायसंमितः चेटीजनैस्समन्युरोधमवरोधमाससाद । ततो न विज्ञातमवज्ञातः । स्वमन्त्रिजनयन्त्रितः किं मन्त्रितवानिति ।

चारणकः – अहीणसत्तसतव्ससाहीणव्सकुदो मंतिजण-
पअणअंतणं कुदो वा राअतंतमं तणंभद्दकाली-
प्रसादबलावलेपभरतव्थबुव्धीसिन्धमव्णंणमव्णइ ।
[अहीनसत्वस्य तस्यस्वाधीनस्य कुतो मन्त्रि-
जनवचनापत्रपा ? कुतो वा राजतन्त्रमन्त्रणं
भद्रकाली प्रसादबलावलेपभरस्तब्धबुद्धिः सिद्धमन्यं
न मन्यते ।]

मैत्रकः – अत एव ब्रवीमि । मानी हि स किं करोतीति जानीहि । अथवा सह वा गत्वा जानीवः ।

[इति निष्क्रान्तौ]

[चूलिका]

[ततःप्रविशत्याकाशयानेन नारदः पर्वतश्च]

नारदः – (सहर्षं) अहमिदानीं ।

प्रत्यूषे प्रतिबुध्यशौलसुतया सञ्चिन्त्य गङ्गाधरं
मन्दाकिन्युदके निमज्य सुचिरं निर्माय कर्मोचितम् ।
कैलासे प्रणिपत्य रुद्रमनुभिःसंस्तुत्य कामान्तकं
शैलाद्रिं सनकादि योगिनिवहानामन्त्र्य निष्क्रान्तवान् ॥

पर्वतः – भगवन्नद्यदेवदेवस्य मेहादेवस्य प्रभातसेवा-मारचय्य स्वभुवनाय सत्वरं निर्गत्य पितरं

पितामहं, पितामहं ,परमपुरुषं वाप्यननुसृत्य तत्र वा स्थित्वा भगवन्तं मदनान्तकनिमिषया दृशासुचिरमनिशाम्य सनकसनन्दनादि महायोगिवदनगलितामनन्तकल्याणगुणगण परिमलितां भक्तिरसपरिमिलितामममृताप्लावित श्रोतृजनश्रोत्रपथां शिवकथामप्यनिशम्य सम्यङ्गादृशामप्यनुपदिश्य शिवभक्तिसरणिमन्ततः स्वयमपि वैकान्ते निरन्तरशिवचिन्तन-मप्यनाकलय्य, कान्दिशीकमृगेणेव कां दिशं प्रतिपद्य निर्वृतिर्भवतीति चिन्तयता भवता गन्तव्यदेसमप्यनियम्य गम्यते । क्षणेन प्रदक्षिणीकृतं च क्ष्मावलयम् ।

हन्त ! हन्त ! ब्रह्मसूनुरसि, ब्रह्मर्षिरसि, ब्रह्म-विदप्यसि ।

किञ्च-

वैराग्यालङ्करणं भवतः संशान्तमान्तरं करणम् ।
का वा धीरदुरंता परमशिवध्यानभेदिनी चिन्ता ॥

नारदः - सखे ! सन्ततकृत सहसञ्चारतया जानन्नपि मदाशयमजानन्निव ब्रवीषि । आप्रभातमासङ्गवो-दयाददतिबुभुक्षितयोर्युद्धविलोकनबद्धकौतुक-जुषोश्चक्षुषोः सौहित्यसम्पादनाय सर्वतः सम्भ्रमेण बभ्रम्यते ।

आपूर्वाद्रेराचपाश्चत्यशैला-
दाकैलासादाचलङ्कानगर्याः ।
भ्रान्त्वा भ्रान्त्वा वीक्षणे क्वापि नैव
युद्धश्रद्धा बध्यते केन वापि ॥

पर्वतः - आर्य ! निस्पृहतया भवत्येव निगृहीत निखिल-करणग्रामस्य तव दूरीकृत्य सम्भ्रमणकथाम् । निगमशिखराभ्यासव्यासंगेन निर्वृतिरनावृतिः ।

नारदः -सखे ! शृणु !

छन्नेष्वप्यखिलेषु हन्त ! करणद्वारेषु बुद्धेर्बला-
देकश्चेद्विषयाभिलाषिकरणं मग्नः पुमान्संसृतौ ।
रज्जुस्नेहविशेषलोहजतुभिर्बद्धेषु रन्ध्रेष्वपि-
स्याच्चेदेकमपावृतं खलुतरीर्मज्जेदगाधेम्भसि ॥

(सव्यथं)

त्रय्यन्तग्रन्थिभेदस्फुरघटितपरब्रह्मतत्वावमर्श
स्फायन्निस्सीमभूमानधिकसममहानन्दनन्दं धृतापि ।
प्राणत्राणापनीतादरपरदरदस्वैरचारायुधीय-
स्पर्धाबद्धाशयाद्दग्भवति मम कथं निर्व्रणं निर्वृणोमि ॥

पर्वतः - नित्यानुभूते किमत्यादरः ।

नारदः -

असकृदनुभूतं मेत-
द्युद्धं तृप्त्यै न कल्पते किञ्चित् ।
ग्रामोपाध्यायानां
कतनभोजनमिवाविरतम् ॥

पर्वतः - सत्स्वपि विषयान्तरेषु किया समभि व्याहारेण किमत्र मिर्बन्धः ।

नारदः -

विविधाऽय तिष्ठतां
विषयाः कामं न ते प्रीत्यै ।
कृपणजनस्येव धनं
आयोधनमेव मे देशाविष्टम् ॥ किञ्च -

काम्यमिव कर्मदरे नित्यं नैमित्तिकं चास्तु ।
दृष्ट्वा कल्पमपि रणं प्रायश्चित्तं करिष्यामि ॥

चिरजीवितया दृष्टेष्वपि कआलेषु न कश्चिदप्येवं विधः समयः ।

किन्नाकार्षीद्धीरसृष्टिं विधाता-
किं वा सम्यग्बोधको नास्ति तेषाम् ।
जाता लोका हन्त ! सिद्धाश्रमाः किं
नास्ति क्रोधा देव तिर्यङ्गरेषु ॥

(विचार्य)

चर्चां कर्तुं येन कुर्वे प्रत्न-
मर्चां कर्तुं निश्चिनोत्येष मह्यम् ।
स्वेनस्वस्यायोधनं नैव युक्तं
चित्रं चित्रं चित्रयुद्धे दिदृक्षा ॥

(चिरादधो विलोक्य) (हर्षातिशयमभ्निनीय)

सखे ! पश्य ! हन्त ! सुश्लिष्टमस्मदिष्टम् ।

संवर्तानिलनर्तितोरुलहरी द्वरीकृतान्यध्वनि
क्षुभ्यद्दुर्जदपारसागरयुगभ्रान्तिं ददाते दृशोः ।
योधाश्वे भरथानकादिनिनदप्रोद्यत्प्रतिश्रुद्धल-
द्दिग्भित्तीरणकेलिबद्धहृदये दिष्ट्याद्य सेने उभे ॥

पर्वतः -

रणोत्मयो कयोः राज्ञे युंजाते प्रबले बले ।
समन्ताद्युद्धसन्नद्धे इव सुत्रामवृत्रयोः ॥

नारदः - कन्यार्थिनो नन्दकनृपस्य ढिल्लीपतेस्तद्धान-
विमुखस्येन्द्रसखस्य च ।

पर्वतः - वामतः पश्य !

अलक्ष्यनृपलक्ष्मैतदनीकमुपलक्ष्यते ।
अन्तरिक्षमिवक्षीदयमप्यपक्षणदाकरम् ॥

नारदः - (विलोक्य) उपस्य भद्रकालीमपास्यभीर्तिं
युयुत्सु रुदायुधतदालयमुपसीदति ।

दिल्लीपतिः -(पश्यैनं)

हीरालङ्कारशङ्काजनक हिमकरक्षोद संरूषिताङ्गे
मातङ्गे तास्थिवांसं नृपमपरभिवैरावतारूढमिन्दम् ।
आवृत्यावृत्यनृत्यंत्यतिरभसवशात्सात्विकै राङ्गिकै श्च
स्ववेंश्यावद्धिलासप्रचुरमुभयतःपार्श्वयोर्वीरमुख्याः ।

पर्वतः - (कर्णा दत्वा) किमाहुर्नृपकिङ्कराः ।

आहन्यन्तां समन्तान्मणिगणखचितैर्वाद्यभाण्डानि कोणैः
सिच्यन्तां शीततोयैः मृगमदमिलितैर्वीथयो भूधवानाम् ।
बध्यन्तां तोरणानि प्रकटितकुसुमभ्राम्यदिंदिंदिराणि
प्रासादाग्रेषु राका हिमकरकिरणश्रेणिगौरेषु पौरैः ॥

नारदः – (श्रुतिमभिनीय) किमाहुःपुरोधसः ?

पाटीरद्रवमेदुरैरविरलैःकस्तूरिकाकर्दमै-
रालिप्तासु वितर्दिकासु विविधै श्रीभद्रकाली गृहे ।
वर्णौ स्वस्तिकशङ्खपद्मरचनामातन्वतां शिल्पिन-
स्तूर्णं पूर्णमनोरथो भवतु वःकृत्येन ढिल्लीश्वरः ।

पर्वतः – आर्य ! पुरतो दृश्यताम् ।

रम्भास्तम्भा शातकुम्भस्वरूपा
द्वारे द्वारे तोरणाङ्का निखाताः ।
माल्यैःक्लृप्तं लोलभृङ्गैर्वितानं
सौधेसौधे वैजयन्त्योऽवनद्धाः ॥

(निर्वर्ण्य, साश्चर्यं)

जापागुच्छाया परिभवचणं कुङ्कुमराजः-
प्रवालश्रीचोटं विमलकुरुविन्दद्युतिसखम् ।
समुन्मीलद्बालद्युमणिघृणि शङ्काकुलजनं
गृहद्वाराद्देतत्किमपि सुमहद्दीव्यतिमहः ॥

नारदः – (विलोक्य, सप्रश्रयं)

द्रष्टाकोटिविशङ्कटाभ्रटनटद्भ्रूकुटच्युरोरुद्भट
भ्राम्यद्भ्रूभुजङ्गहारलतिकाभीमाट्टहासोन्मुखी ।
हालास्वादमदारुणेक्षणरुचिःकालीयदाम्भोरुह-
द्वान्द्वाराधनसावधानहृदया शक्त्यावलिर्दृश्यते ॥

(अन्यतो निरूप्य) सखे ! पश्य !

मृगमदसौरभलोभा-
दलिकपतन्मधुकरव्राताः ।
अलकैः काल्यामिलिता-
न पृथग्भावं भजन्ति नृत्यत्वात् ॥

(साश्चर्यं)

कोटीराद्यैर्बहुविधमणीमञ्जरीरञ्जिताग्रै-
र्मञ्जीरान्तैर्बहुलकनकस्फूर्तिभिर्भूषणैर्या ।
विद्युत्पुञ्जछुरितवलभिच्चापरेखामयूरवां-
प्रावृल्लक्ष्मीमिहवितनुते कालिका कालिकेव ॥

किञ्च-

त्रिगुणमयीमिव मायां-
करकमलस्थां त्रिवर्णकेलिशुकीम् ।
अधरसुधा सहचर्या-
वाचा देवी विनोदयन्त्यास्ते ॥

पर्वतः - (श्रुतिमभिनीय, वारणादवतीर्णं राजानं पुरस्कृत्य)

अर्धोन्मीलत्कटाक्षप्रवहणसरणेरम्बिकायाःसलीलं
सङ्गीतं साधयन्त्याः सरिगमपधनीत्यक्षराक्षीणरागम् ।
वीणांराणाभिरामामुरसिजकलशाभ्यामवष्यभ्यगीर्भिः -
कीरीमालापयन्त्यास्रवदमृतरसो मन्दहासो वतान्नः ॥

नारदः- (कर्णं दत्वा, भगवतीमुपसृत्य) साञ्जलिः किमाह ढिल्लीपतिः ।

जय लोकैकजननी जयभक्तशुभप्रदे ! ।
जय कल्याणचरिते ! जय मातङ्गिकालिके ॥

जय जय जगदम्ब कादम्बबिम्बादरायान-बिम्बोकसम्बोधनव्याग्रतोदग्रजाग्रत्पदाम्भोरुह-द्वन्द्वयानेस्फुरद्वेदमाने । मुदा व्योमयाने सदा शोभमाने नतानेकदिक्पालजल्पाकतामेदुरांघ्रि-द्वयीमञ्जुमञ्जीरसिञ्जा विनोदे । गलद्भक्ततोदे ! जगत्पूज्यपादे ! हताऽऽमित्रवादे मुदेदेवि दिव्याङ्गनानामनङ्गारिशृङ्गारभङ्गीतरङ्गी भवद्भूरि सङ्गीतमङ्गीकरोषि । स्फुरच्चन्द्रिकामण्डला-खण्डवेतण्डशुण्डाप्रकाण्डोरुकाण्डात्तकौसुम्भ-चण्डातकोच्चण्ड चण्डांशुरुङ्मण्डली खण्डितोऽद्दण्ड-विध्यण्भाण्डांतरालस्थ घोरान्धकारे । स्ववश्यान्धकारे शिवे । कनककलशकान्ति पाटच्चरात्युच्च-वक्षोरुहद्वन्द्व सत्कुङ्कुमक्षोदसम्मेलनोद्दामकमुक्तामणी-दामसम्पद्विडम्बावलम्बोक्त जाम्बूनदाद्रि प्रभाताम्र नक्षत्र जाले । वचोदूरलीले शिरोबद्धमाले परादूतकाले तटिच्चारुचेले नवाम्भोदनीले सुरीनृत्तलोले महेशानुकूले रमे गौरि बाले जगन्नर्तनागार-नृत्यज्जटाटीरकोटीर कोटीतटी नानटद्गाङ्गभङ्गालि-भङ्गावहात्मीयकीर्ते । दयासान्द्रमूर्ते ।

कनत्काञ्चनोदारकाञ्चीकलापांचलोदञ्चितस्फार-गारुत्मतद्योतदूर्वा नवाङ्कूरशङ्काकुलीभूतभूतेशहस्तांग्र-जाग्रकुरङ्गे । जगन्मङ्गले । विसरदमृतनिम्नगा-

पूरमाधुर्यसोदर्यवाग्वैखरीसम्भवन्मौखरीकस्वहस्त-
स्थलस्यापिकीरीपरीहासवाणी प्रवीणे करोद्धासिवीणे ।
स्तनाम्भोजकोश भ्रमायातलोलंब डिम्भावली शेमुषी
पोषि रोमावली यामुनाम्बुप्रवाहान्तरावर्त सन्देहदायी
नाभीपुटीबन्धुरो कम्बुजित्कन्धरे । प्रोल्लसत्पल्लवश्री
तिरस्कारि दन्तछदाछविछन्नदन्तान्ती
दाडिमीबीजसन्देह वेगागताकार कीरे ।
दृगुल्लासकल्लोलिनी पूर संवर्धितानेकमारे ।
कनत्कर्णपूरे । जगन्नायिके । कमलनयनभामिनी
भारतीपाणिपङ्केरुहान्दोलितामन्दमन्दाकिनी
बिन्दुनिन्दाकराकाराभृच्चामरोद्धूत वाताङ्कुरा
धूतगन्धभ्रमद्धृङ्गवारे लसत्स्वेदनीरे दयालो कुमारे
क्षणक्षाभितारे नतान्तर्विहारे चलत्तारहारे नखोद्यन्मुरारे
सहायत्पुरारे महापापदूरे मनो वागतीते त्रिलोकप्रतीते
शरण्ये वरेण्ये सुपुण्ये समस्त प्रशस्तत्रयी मस्तका
स्तोकगीस्तोम संस्तूयमानाङ्घ्रिपद्मे सुपद्मे ।

शिवे देवि दुर्गे महादेवि तुभ्यं नमस्ते नमस्ते
नमस्ते नमस्ते नमः ।

“शृङ्गारार्णव पूर्णचन्द्रकलिके सङ्गीतराज्याधिके
भक्ताभीष्टफलप्रदानरसिके फालान्तकस्तूरिके ।
पाकारातिमणीविनीलचिकुरे . बन्धूकशोणाधरे
मूकानामपि सत्कवित्वसरणिःश्रीप्रायिके कालिके ॥
मन्दहासरुचि कन्दली सुधा
सान्द्रचन्द्रवदनोज्वले शिवे ।
मां मतङ्गकुलनन्दिनिस्फुर-
त्कीरपाणि कमलेऽम्ब ! पालय ॥

मणिमय कलशीमति प्रदाभ्या-
मवनतमध्यमसीमनिस्तनाभ्याम् ।
मघवदुपलधाम्निलीये
हरिहरवन्द्य पदारविन्दयुग्मे ॥

पर्वतः - (विलोक्य) अहो ! भद्रकाल्याः प्रसादप्रकार्षः ।
दलितशिखरिमौलिं दत्तदम्भोलिकेलिं
दमितदुरितपालिं दानवध्वान्तहेलिम् ।
वितरति कृतघृष्टिं रत्नमुष्टिं शिवास्मै
रणहतरिपुनिर्यद्रक्तशोणं कृपाणम् ॥
भगवन्पश्य ! ढिल्लीपतिः सन्नाहयमारुह्य समधिकसम्मद स्समरसम्मुखः समापतति । ततः खलु
त्रस्यद्दिग्दन्तिबृन्दः क्षुभिततरसरिन्नाधकल्लोलमाला-
र्भटया बिभ्यद्धधूढीमृदुलभुजः समालिङ्गतांभोरुहाक्षः ।
युद्धप्रारम्भभेरीवदननिनदस्वैरगंभीरिमास्य
प्रोनमज्जात्यद्यसद्यस्तनितधिषणयाक्रीडदाक्रीडकेकी ॥

नारदः -
सैन्यभारभरणा सह नत्वा
दम्बरां गणमवाप्य चन्ती ।
मेदिनीवपृतनाजनितानां
भाति हन्त ! रजसां तति रेषा ॥
(अन्यतोऽवलोक्य)
जैत्रश्रियोऽभिसरणावसरोपयोगि-
छान्तच्छटापटुपटीहरिदङ्गनानाम् .।

संदृश्यते बलरजः पटलीरिपूणा-
मुत्पातसूचकपतङ्गपरम्परेव ॥

अपि च -

कुलगिरिशृङ्गरोहण-
केलिश्रान्तेव वाहिनी रेणुः।
अहह ! पिबतीहसलिलं-
सलिलनिधौ भूरिगाढमवगाढ ॥

पर्वतः -(सोल्लासं)

करिकर्णतालमारुत
तरलितवसनाः पताकिकाभान्ति ।
वीरवरकाङ्क्षिणीना
ममरीणां व्यूहमाह्वयनय इव ॥
(पुरतो निरूप्य)
ध्वजपटपवनविधूनन-
विशकलिताजलद संहतिर्गगने ।
सरसीव विकसितानां-
जनयति नीलाम्बु जन्मनां शङ्काम् ॥

नारदः - सखे ! पश्यतु ! भवानग्रे ।

सितातपत्र पटली रणरङ्गपयोनिधेः ।
डिण्डीरमण्डलरुचिं विदधाति ततस्ततः ॥
(सानंदं)
श्रीवीरलक्ष्मीपदकञ्जमञ्जु
मञ्जीरसिञ्जाविभवानुकारी ।

धनुर्धराकृष्टधनुःप्रकाण्ड-
टङ्काररावस्तनुते मुदं नः ॥

(अन्यतो विलोक्य)

आस्फालयन्ति बृहतश्चार्मिकाः फलकानमी ।
भुजमण्डलसंसुप्तशौर्योद्बोधकरा इव ॥

इतो विलोक्य तावत् ।

कदनभूमिसमुत्थरजः छटा-
चटुलशार्ङ्गककूजितगर्भिता ।
कटुनिशाटनहुंकृतिभीकर-
प्रबलसन्तमसालिरिवेक्ष्यते ॥

पर्वतः – (साश्चर्यं) भगवन्नत्र दीयतां दृष्टिः ।

प्रलयसमयझंझामारुतव्रातवेगा-
त्कुलधरणिधराणां कूटशो घट्टितानाम् ।
रचयति मम बुद्धिं यन्तृभिश्चोद्यमाना
दद्भुततरकृतदन्तादन्तिदन्तावलालिः ॥

अहह !

प्रचण्डभटमण्डलीकरपुटीकृपाणीलता
विपाटितमदाबलाधिपतिमस्तकाञ्चिस्तलात् ।
अनर्गलविनिर्गलद्रुधिरधोरणीशुष्मण
स्तनोति दिवि गृध्रसंततिरियं हि धूमभ्रमम् ॥

(साश्चर्यं)

आहावाहतसुयोध भेदितं
मण्डलं स्फुरति चण्डदीधिते ।

वीरवर्गपरिमार्गणोत्सुकः
स्वर्गलोकरमणी गवाक्षवत् ॥

कथमिदमतितुमुलसम्प्रहारविहितादरमपि
द्विधाविभज्यते महाराजयोर्बलजलनिधानम् ।
द्रवदिदमबलंबलं तत्समीरोच्चलत्तूलव-
त्सरभसमनुधावनोद्यत्परानीकनिःसारितम् ॥

मृगकुलमिवलुब्धविद्धावि नद्धातिवेगाकुलं
विशकलितमभूत्प्रभूतत्रपे भूपतौ निर्जिते । भगवान् !
कस्यजयः, कस्य वा पराजयः इति न ज्ञायते ।

नारदः - विशदीकृतैव जयपराजयोर्व्यक्तिः ।

तथाहि -

एते प्राकारश्रृङ्गाण्युरुगलविगलद्रक्तधाराभिषिक्ताः-
सन्ध्याकालाभ्रसङ्गा इव गिरि शिखराण्याहताश्चण्डवातैः ।
हाहाकारान्सृजन्तो हरहरकरुणं ढिल्लिकाभूमिभर्तु-
र्योद्धारःप्रत्यनीकप्रहरणदलनैःपान्दिशीकाभजन्ते ॥

किञ्च -

केचिन्मज्जन्ति नद्यां क्वचिदपि निबिडे व्रीडतो वृक्षपण्डे-
लीयन्तेऽन्ये परेतु व्यसवइवकरस्रस्तशास्त्रापि वस्त्राः ।
भ्रान्त्या स्वानेवकोऽपि प्रतिभटजनता शङ्कया किङ्करौघान् -
घ्नन्त्यन्ये विद्रवंति द्रुततरमपरे पर्वतानाश्रयन्ते ॥

सखे ! पर्वत ! पलायनंपर एव तर्क्यते
ढिल्लीश्वरोऽपि ।

आरूढनन्दकतुरङ्गखुरोत्थपृथ्वी
रेणुछटापि हितनेत्रतया गजेन्द्रः ।
सङ्कुप्यदिन्द्रसखनिष्ठुरचोदितोऽपि
निर्गच्छति द्विगुणमन्दगतिस्स्वसैन्यात् ॥

पर्वतः - (सखेदं)

सङ्ग्रामाङ्गणसीमनि स्वरधिभूर्दैत्यावलिं यद्भुजा
शौर्येणर्योष्मिज्वलितैस्स्ववज्रविभवैरत्युद्धतैर्मृष्यते ।
ढिल्लीवल्लभ एष रोषकलुषो यात्याजितस्त्याजित-
स्थैर्यः शतृबलेनहन्तकिमिदं व्यर्थःप्रयासो विधेः ॥

नारदः - सुरासिराणामपि तामसपूजापराणां दैवत
प्रदनमपि समीहित व्युदसनम् पश्य !
कण्डूलेन विचालितःसिवगिरिर्दोर्मण्डलेनक्षणा-
द्वित्तेशस्य विमानमप्यपहृतं .स्याप्यनायस्यतः ।
लङ्केशः सनिरस्य साङ्करमसिंशकिं च तां वैधर्सीं
द्धीणःप्राणपरायणःखलुरणाद्योतो विपातोऽपि सन् ॥

(पुरतो विलोक्य, सहर्ष)

कथमेतौ गन्धर्वकुलपते विश्वावसोरनुचरौ मेवर्ण-काञ्चनाङ्गौ सम्प्राप्तौ ।

(प्रविश्य)

गन्धर्वौ - (प्रणिपत्य सविनयं)

भगवान् ! अद्य चरणकमलपरिचरणतपश्चरण परायण नारायणादि देवस्य महादेवस्य मध्यह्नसेवा समुत्सुकेन गन्धर्वनायकेन विश्वावसुना भवदागमनं प्रतिपाल्यते ।

नारदः – (सम्भ्रमुत्थाय, सपरितोषरोमाञ्चनं, शिरस्यञ्जलिं घटयन् हरहरहर इति तारध्वनिना इति निखिलदिशायमापूरयन् आनन्दातिशयमभिनीय)

अद्य हि –

प्रालेयाद्रिसुतापरिष्कृततनुं पार्श्वद्वये मूर्तिम-
त्त्रैय्यन्तस्तुतमीश्वरङ्कलयितुं कैलासशैलालये ।
द्वारोपान्तनिषण्णनन्दिनयनभ्रूक्षेपवक्त्राङ्गुली-
वाचामुक्तनिरोधनैस्सुरवरै ब्रह्मादिभिर्भूयते ॥

(विमृश्य सात्मोपालम्भं)

अनभ्यस्य विविधागममर्माणि द्रुततमपास्य सकलाश्चर्य तपश्चर्यादुर्लभमपि भाग्यपरिणाम सुलभं गौरीवल्लभमथर्वशिखाध्ययनबोधाचार-पटुरप्ययंडनः । प्रभञ्जनेन तृणमिवरणदृष्टि-दुष्टग्रहेणदूरमाकृष्ट स्वयमियन्तं दिष्टं किमिष्ट-मतनिष्ट ।

(सखेदमोदं)

धातेत्यच्युत इत्यमर्त्यपतिरित्यन्ये दिगीशा इति
त्रैविद्या इति तात्पसा इति परे योगावलम्बा इति ।
ब्रह्मज्ञा इति च प्रसिद्धिकथने नाम्ना न किञ्चित्फलं
शम्भुं पश्यति यः सदा स तु महान् जात्या पिशाचोऽपि सम् ॥

अहो धन्याः सनकसनन्दनादयः सुरमुनयः ।

यदिदानीं–

वाग्देवी कमला शचीसहचरैः क्लृप्तोपचारक्रमं
दक्षे पद्मजपद्मभाभमघवद्वारैश्च वामे पुनः ।

अग्रे नन्दिपुरस्सरैरनुचरैः पश्चाश्च भूतादिभिः-
कैलासे कलयन्ति कांक्षितदुहं कामान्तकं सन्ततम् ॥

(सस्नेहबहुमानं)

सकललोकशङ्करस्य शङ्करस्य मध्याह्नसेवा समयं स्मारयता ममानिर्वचनीयं वसुना विश्वावसुना किमकृतमुपकृतम् ।

यदद्यास्मान् ।

शम्भुसेवाव्यतिक्रान्ते रतिक्रान्तावधेरयम् ।
उदतीतरदायातः प्रत्यवायमहार्णवात् ॥

(परितोऽवलोक्य)

दैवादद्यजन्यं च प्रशान्तराजन्यम् । तदेहि त्वर्यतां समीहित साधनाय ।

पर्वतः- अगत्या झटित्यावश्यके परमनयोः समाधाने परिणीतिरपि भविष्यतीति मन्ये ।

नारदः- तत्राप्यासक्तं मम चित्तम् ।

तथापि-

परिणीतौ प्रसक्तायामेतावावेदयिष्यतः ।
कैलासमेव गच्छावः काङ्क्षितार्थोपलब्धये ॥

[इति निष्क्रान्तास्सर्वे]

॥ चतुर्थोऽङ्कः समाप्तः ॥

॥ पञ्चमोऽङ्कः ॥

[ततः प्रविशतः काञ्चनाङ्गमेघवर्णौ]

काञ्चनाङ्गः – अहो रामणीयकं ढिल्लीनगरस्य ।

प्रविततजनालोकप्रेङ्खद्वधूवदनद्युति-
र्मरकतमणी सौधश्रेणीगवाक्षपरम्परा ।
उदयपिहितश्वेतज्योतिः प्रभाकलितान्तरा
जनयतिपयोवाहछेदछटेवदशोर्मुदम् ॥

(सौरभाघ्राणमभिनीय)

वेणीदामपरीमलेन मिलिताः क्षोणिभृदेणीदशां-
वीथीसेचनमुक्तचन्दनरसामोदप्रवाहस्पृशः ।
सौरभ्यग्रहलोभचञ्चलदलिव्रातानुयातामुहु-
र्नाघ्राता मरुतो नृणां विदधते किं घ्राणसम्प्रीणनम् ॥

मेघवर्णः – (सविस्मयं)

शाणोल्लीढपरिस्फुरन्घनमणिश्रेणीकृतात्युन्नत-
प्राकाराग्रसमग्रदर्पणतलप्रोद्भिम्बितान्या मुहुः ।
ग्राहावर्तगभीरतातिगगनासाक्षादियं स्वर्णदी-
मत्येतुं परिघा ध्रुवं वितनुते शृङ्गावलम्बप्लुतिम् ॥

(राजवीथीमवलोक्य)

इभैरेके(ते ?)ऽमात्याः पथिपथिबलं ते गिरि निभै-
स्सदश्वैरन्येऽमी विजितपृषदश्वैरतिजवात् ।
अनोभिः केप्येते रयधु(जि ?)तमनोभिर्जविनरै-
स्समूढाभिःकेचित्सपदि शिबिकाभिःकुतुकिनः ॥

नं विज्ञायते किं गमनकारणम् । को वा गन्तव्य-
देशः ।

काञ्चनाङ्गः – (विचिन्त्य) अहो ! विदितम् । पुरा निराकृतिकृतमुखेन सुताप्रदानविमुखेन सम्प्रति प्रतिपक्षक्षपिततया तदुन्मुखेनेन्द्र सखेन समिन्धान यशसा तेन सन्धानं कुरुतेति सन्दिष्टा इमे तुष्टान्तरा नितरां तदन्तिकमुपासीददति ।

मेघवर्णः –(सजुगुप्सं) जयपराजयाभ्यामत्युन्नत-निम्नतया कथमेष दद्यात्कन्यकां एष वा कथमाददद्यात् ।

"विवाहश्च विवादश्च समयोरेव शोभते"[1] इति हि लोकवादः ।

काञ्चनाङ्गः –(विहस्य) ज्ञातायामप्यसमतायां सम्पादितः सापवादः कथं विवादः । भवतु तद्धदेषोऽपि आस्तामिदम् । यथाकथञ्चित् नन्दकनृपस्य सप्रसिद्धिः समीहितसिद्धिः । कुतः ?

कन्याकरग्रहार्थित्वान्मतः कन्याकरग्रहः ।

मेघवर्णः – कष्टं भोः ! कष्टम् । तर्हि परिभूतस्य कथमेतस्य ।

काञ्चनाङ्गः –का क्षतिरस्य क्षितिक्षितः ।

किन्तु – तेन पृष्टे सति ।

"तुष्टेन देया दुहिता क्लिष्टेन परिदीयते"

---

1. भासकविनोक्तः ।

तदलं प्रसक्तानुप्रसक्त्या । कर्तव्यभारस्मर्तव्यः ।

(परितोऽवलोक्य सहर्षं) प्रक्रान्त एव परिणय महोत्सवः । तदेहि सत्वरं नारदाय निवेदयावः ।

[इति निष्क्रान्तौ]

[अङ्कावतरणम्]

[ततः प्रविशतः आकाशयानेन (मार्गेण ?) नारदः पर्वतश्च]

नारदः -

भाग्ये क्वापि कदाचिदप्यभिमुखे योग्यस्यायोग्यस्य वा
श्रेयांसि स्वयमाव्रजेयुरिति यत्सत्यं तदेतद्वचः ।
सेवा तस्य पिनाकिनो दिनमुखे लब्ध्वा च मध्यंदिने
तन्मध्ये रण(वर?)मी क्षितं यदधुना प्राप्तो विवाहोत्सवः ॥

(अग्रतो दृष्ट्वा, सहर्षं)

नानामाणिक्यरश्मिछुरणगुणनिकां बिभ्रदभ्रङ्कषाणां
सौधानामिन्द्रनीलोत्पलशकलजुषामन्तिके तोरणोऽयम् ।
पौलोमी कान्तबाणासनमिवरुचिरं नित्यविक्षिप्यमाणं
प्रत्यग्राम्भोदरेखा निकटपरिगतं राजते राजधान्याम् ॥

पर्वतः -भगवान् ! कल्याणभवनद्वारि दीयतां दृष्टिः ।
भद्रालोकनभाग्यवैभवभरप्रादुर्भवत्कौतुक-
क्ष्मापालावलिमेलनोत्सवसमुद्वीक्षोल्लसच्चेतसः ।
दृक्शङ्कां सदनश्रियो वितरति द्वाराभितस्थापित-
स्तम्भोत्तम्भितजम्भवित्विड्डुपलादर्शद्वयं पश्यताम् ।

(अन्यतः प्रदर्शयन्)

वधूरविलोकनोत्सुकतया बहिर्निस्सर-
त्पुराम्बुरुहलोचनाजनकटाक्षपारम्परी ।
ततोतिपरितःपुरे विकचनीलपङ्केरुह-
छदप्रकरतोरणावलिरुचिं विवाहोत्सवे ॥

(सोत्साहं)

दिगन्तरनिरन्तरप्रसृमरोमरुच्चालितः
प्रधूपिततवागरुप्रचुरधूमधाराधरः ।
विवाहमहसूचनप्रथितधीरभेरी रवै
स्सगर्जितविजृम्भणःकलयते मुदं केकिनाम् ॥

नारदः –अमानुषोऽयमुद्वाहाडम्बरः ।

तथाहि –

उद्दामोद्वाहवेदी तटनिकटजनाटोपनिर्यापणोग्र-
व्यग्रात्मद्वास्थचण्डार्भटकरविचलद्वेत्रदण्डप्रहारैः ।
वित्रुट्यद्राजराजीपटुमकुटतटी निष्पतन्मौक्तिकौघै-
राकीर्णेयं समन्ताद्विलसति पृथिवी द्यौ दिवोदीततारा ॥

(सप्रमोदातिशयं)

गायत्कान्तामुखाम्भोरुहपरिविसरद्वासनास्वादलोभ-
भ्राम्यद्भृङ्गवलीभिर्दिशि दिशि विकसन्नीलनीलप्रभाभिः ।
बध्यन्ते स्वाङ्गलिक्यः कति कतिममुहुर्विस्मयप्रेक्षणीया
श्चैतन्यो भासमानस्त्रिदशपतिमणी निर्मितास्तोरणाल्यः ॥

पर्वतः – भगवन् ! वैणिकमुने ! निर्वृत्तमेवविवाहमङ्गलम् ।

परिणीति वेदिकायां प्रज्वलितेऽग्नौ पतन्ति धुरिलाजाः ।
कवंशनालमुक्ता मुक्ता इवाभान्ति निर्मलावध्वः ॥

(सोल्लासं.)

करतामरसविराजन्नीराजनपात्रमब्जदृग्बृन्दम् ।
नवकर्णिकाकारलतिकाजालकमिव भाति पुष्पितं पुरतः॥

नारदः - सखे ! उद्धाहमङ्गलविलोकनव्यग्रतया कालो महान् व्यतीतः ।

(श्रवणमभिनीय) किमाह ।

त्रिकालवेदी -महावीर ! भवता निष्कण्टकीकृतं रत्नकूट-गिरितटाश्रमपदं प्रवेष्टव्यमस्माभिः ।

(इन्द्रसखं प्रति) किमाह मणिशेखरः ।

मणिशेखरः - महाराजवधूवराभ्यां स्वमाश्रमपद-मलङ्क्रियतामिति मुनिकुलपतेरभिलाषा ।

(कर्णं दत्वा) किमाहेन्द्रसखः ।

इन्द्रसखः - का प्रत्युक्तिरस्ति कन्याजनकस्य ।

पर्वतः - भगवन् ! (बाष्पमुखीं जननीमुपगूह्य, सहर्षं) प्रस्थितैव नवोढा ।

(साश्चर्यं)

वरेण सहितो भाति वध्वा च मुनिशेखरः ।
वेदेन साकं स्मृत्या च[1] वेदान्त इव मूर्तिमान् ॥

(परितोऽवलोक्य) हन्त ! सायङ्कालस्सम्प्रवृत्तः ।

तथाहि -

---

1. श्रुतेरिवार्थं स्मृतिरन्वगच्छत् । -रघुवंशे कालिदासः ।

आपीतान्करसम्पुटैर्मधुरसानाप्रातरायामिनि-
प्रारम्भात्कमलावलीपरिगतानाकण्ठमत्याशया ।
आकाशा(शं ह्यवलम्ब्य?)नवलम्बसत्वरगतिक्लेशासहिष्णुश्चिक्रा-
दारक्ताऽऽतपकैतवादिववमन्नाभाति भासान्निधिः ॥

नारदः – (दृष्ट्वा, ससम्भ्रमं)

सायं सेवासमयं-
शम्भोरम्भोजबन्धुरस्ताद्रिम् ।
अधिरोढुमभ्यवपत-
न्नाचष्टे स्पष्टमस्माकम् ॥

तदावामपि सत्वरं गच्छावः ।

[इति निष्क्रान्तौ ।]

[शुद्धविष्कम्भः]

॥ पञ्चमोऽङ्कस्समाप्तः ॥

*****

॥ षष्ठोऽङ्कः ॥

[ततः प्रविशति तापसशिष्यः]

शिष्यः – (पुरोऽवलोक्य, सहर्षं) चिराय खलु प्रचण्ड-वेतण्डरिपुखण्डनं कुतोभयसञ्चारीकृताश्रम-मण्डलेन वसुंधराऽऽखण्डलेन निवर्तित ढिल्लीपतिसुतापरिणयमङ्गलेन ससखीजनप्रेयसी-परिमण्डितचरमभागेन सानुचरेण नृपवरेण सकलजननयननन्दकेन सप्रश्रयमनुगम्यमानः शतमखप्रमुखबर्हिमुखपरिसेव्यमानश्चतुर्मुख इव भगवानस्मत्कुलपति रयमितएवाभिवर्तते ।अहो ! तावदस्य महानुभावता । यदिदानीं चराचरैरप्युपचारविधिरनुरुध्यते ।

तथाहि –

क्षोणीरेणुभरान्क्षिपन्ति परितःपक्षानिलैर्बर्हिणः-
सिञ्चत्याश्रमवीथिकां सिकतिलामम्भःकणैरम्बुदाः ।
पुष्पाणां प्रकरं किरन्ति कपयस्तम्बेरमाः पुष्करै-
रादायाग्र्यफलानि हन्त ! पुरतः पुञ्जीभवन्त्युत्सुकाः ॥

किञ्च –

विष्वङ्निर्मित पल्लवैर्विदधते वृक्षावितानश्रियं-
बालान्त्यः शुकशारिकामधुमुचावाचा [1]जयेत्यारवम् ।
श्रेणीभूय शिलीमुखा विटपिनां शाखालसत्तोरणाः
सन्धीभूय सहायतां मृगगणा सप्रश्रयं सम्मदात् ॥

---

1. कादम्बरी ।

यावदयमाश्रमपदमलङ्करोति तावदहमचिरा-
दग्नीनुपसमिध्य समित्पाणिरेनं प्रत्युपस्थास्ये ।

[इति निष्क्रान्तः]

[शुद्ध विष्कम्भः]

[ततः प्रविशति यथा निर्दिष्टस्त्रिकालवेदी]

त्रिकालवेदी – (परितो दृष्ट्वा, सहर्षं) अहो ! श्राव्यता सामगानस्य ।

अध्येतॄणामद्य साम्नां वटूना-
मेत्याभ्यर्णं निर्भयं सामगानम् ।
श्रावं श्रावं पर्णशालासु मार्गं
बृन्दं मन्दं मन्दमानन्दतीह ॥

राजा –मणिशेखर ! महान् खलु ! भगवतः कुलपतेः प्रभावः । येन वयं दृङ्निमीलन क्षणमेव सम्प्राप्ता रत्नकूटगिरिशिखरम् ।

मणिशेखरः – दुरवगाहमहिमानिधानानि तपोधन-प्रधानानि नाम ।

देवसेनः – (घ्राणमभिनीय)

चर्वाज्यदुग्धदधिमुख्यहविर्विशेष-
स्सम्बन्धगन्धिलवितानहुताशनोत्थाः ।
पारावताङ्गरुहदीधितयस्समीर-
क्षिप्ताहि धूमलतिका दिवमुच्चरन्ते ॥

त्रिकालवेदी - सकलतपश्चर्यातिशयास्पदं सन्निकृष्ट-मस्मदाश्रमपदम् ।

[सर्वे प्रवेशं नाटयन्ति]

राजा - (साश्चर्यं)

मनोमलक्षालनदक्षशीला
स्वसेविनामन्यनिरासलोलाः ।
इहाश्रमे भान्ति महाविशाला-
वेदान्तलीला इव पर्णशालाः ॥

किञ्च -

सत्रिस्वराध्येतृमुनीन्द्रबाला
धौतास्तृतप्राङ्गणवल्कचेलाः ।
आसन्नवापीकलहंसमाला
वहन्ति शोभां मुनिपर्णशालाः ॥

त्रिकालवेदी - यदेतदृषिमंडलमण्डितमावृतीभूतकुट-जमस्मदीयमुटजम् ।

[सर्वे पर्णशालामुपसरन्ति]

कलावती - (अपवार्य, साश्चर्यं)

चंदिए काणुखुएसा वक्कलवसणं वसन्ती सअलदिसावआसं णिअव्यहाएवलाह असअलाणुवन्धा विव्जुलदाविअ पआसअंतीपवण साला मुहे दीइ ।

[चन्द्रिके कानु खल्वेषा वल्कलवसनं वसाना सकलदिशावकाशंनिजप्रभया वलाहकशकलानु-विद्धा विद्युल्लतेव प्रकाशयन्ती पर्णशालामुखे दृश्यते ।]

चन्द्रिका – सहि एदव्स मुणिसंवहूमव्स सहधव्यआरिणी अदिहिव्पिआपडिव्खइअह्माणंआमणं ।

[सखि ! एतस्य मुनिसार्वभौमस्य सहधर्मचारिणी-अतिथिप्रियाप्रतीक्षतेऽस्माकमागमनम् ।]

बुद्धिमती –(सकौतुकं) दाणीं धव्णा खु वअं संवुव्ता । जं एआरिस तावस वहूदंसणेण पाविदा होव्मा ।

[इदानीं धन्या खलु वयं संवृत्ताः । यदेताद्दसतापस वधूदर्शनेन पाविता भवामः ।]

विदूषकः - के उण एदे उपाअणपाणओ. दिसंति ।

[के पुनरेते उपायनपाणयो दृश्यन्ते ।]

देवसेनः – अस्मानातिथ्येन सत्कर्तुमुपहारकराः प्रत्युप-तिष्ठन्ते कर्मनिष्ठाः ।

त्रिकालवेदी – (तपस्विजनोपनीतानि तानि तानि फलान्यादाय) महाराज ! स्वीक्रियन्ताम् । (इत्यर्पयति)

राजा – (सविनयं) गृह्णाति ।

विदूषकः – सव्वं एदं फलजादं मव्झएकव्सबि ण संपुव्णं ।

[सर्वमेतत्फलजातं ममैकस्यापि न सम्पूर्णम् ।]

मणिशेखरः – आद्यूनकिमेतानि प्राकृतानि मन्यसे ।

त्रिकालवेदी -

अमरपुरपुरन्ध्री मोदनीरन्ध्रभाव-
प्रकटनपटु धाटीशालिनस्सर्पशत्रोः ।
करघटगलिताभिस्सिच्यमानात्सुधाभिः-
कनगिरिवनान्तादाविरासन्नमूनि ॥

तर्ह्यमृतमयान्येवैतानि ।

त्रिकालवेदी - अपरश्चैषां महिमातिशयः ।

सदा रसानामेतेषां फलानां सन्निधानतः ।
वियुक्तयोस्तरुणयोस्सङ्गमो भविता पुनः ॥

राजा - महदद्भुतमिदं यदतिशयोऽयं फलानां न दृष्टचरो न श्रुतचरश्च ।

मणिशेखरः- महानुभाव ! सन्ति किमन्यान्यप्याश्रम-पदानि तपोधनानाम् ।

त्रिकालवेदी - इह कियन्ति न वा सन्ति वासन्तिकया विभूत्या समुल्लसितान्तराण्याश्रमान्तराणि । किन्तु -

सिद्धयोगिवनं यावत्सञ्चारस्तावदेव नः ।
ततःपरं न गन्तव्यं दुर्घटःपुनरागमः ॥

मणिशेखरः - (सविनयं) भगवन् ! कञ्चित्कालमाश्र-मान्तरेषु तत्र तत्र वसन्तलक्ष्मी विलासानध्य-क्षयन् क्षिप्रं सायमग्निहोत्रदिदृक्षुरागन्तुमभिलषति महाराजः ।

त्रिकालवेदी – (साशङ्कं) तर्ह्यवहिताः साधयत [इति स शिष्यः निष्क्रान्तः ।]

(सर्वे वनान्तरप्रवेशं नाटयन्ति)

राजा – सर्वाश्चर्यनिधिरसौ शिलोच्चयशिखामणिः ।

शिखरोत्थहरिण्मणिद्युतिं
शिखरीन्द्रस्य निरीक्ष्य नाकगाम् ।
विदधीतननालशेमुषीं
परमेष्ठ्यासनपङ्कजस्य कः ।

(अन्यतोऽवलोक्य)

अनुतटमतिनिर्मलात्मिकायां-
स्फटिकमणीमयमेदिनीसरस्याम् ।
विरचयति विनिद्रपद्मशङ्कां
विबुधवधूपदपद्मयावकाङ्कः ॥

मणिशेखरः – (सोल्लासं)

किरातहस्ताग्रकृपाणधारा
विदारितेभेन्द्रशिरःप्रमुक्तैः ।
मुक्तापलैर्दन्तुरिता चकास्ति
मनश्शिला तारकितेव सन्ध्या ॥

(सस्मितं)

श्रीखण्डखण्डनोद्दण्डचण्डवेदण्डमण्डली ।
बिभेत्यदःशाखि काहि फणारत्नप्रभोल्मुकात् ॥

देवसेन ! इतोऽपि पश्य ! तावत् ।

निष्पतज्झरतुषारतुषारै-
स्ताडितोऽद्रिपतिरेषसमीरैः ।
राजते पुलकितामिव मूर्तिं
बिभ्रदुद्धतकरीरमिषेण ॥

देवसेन : -(पुरस्तादवलोक्य, सचमत्कारं)
अरुणमणिधरित्रीं सन्ततं सल्लिहानं
रुधिरलहरिबुध्या जिह्वये मां तरक्षुम् ।
अनुगिरमतिवेलं वीक्षते निर्विशङ्कं
शबरयुवतिरेषा सन्निधौ वल्लभस्य

कनकशैलातिशायिनी खल्वेतस्य रमणीयता ।
अभ्रङ्कषं कनकशृङ्गममुष्यकान्तै-
रध्युष्यपुष्यदसमास्त्रकलाकलापाः ।
सौमैरवीं ननु शिरोवसतिं चिराय
दिव्यस्त्रियःपरिचितामपि विस्मरन्ति ।

राजा - (द्वित्राणि पदानि परिक्रम्य)
अभ्यग्रानूपदेशेष्वतिमृदुलदलानिर्भराङ्कूरगर्भान्
दर्भान्बिभ्रत्सु शुभ्रद्युतिमणिसिकताराजिकाराजितेषु ।
सानन्दं मन्दमन्दं मुकुलितनयनं बृन्दमेषांमृगाणां
शेते वातेरितक्ष्मारुहदलनिनदाद्धावितुं चेष्टते च ॥

राजा - मणिशेखर ! इतोऽपि पश्य ! तावत् ।
ग्रावाग्रलूनमूलं-
गरुडशिलाकान्तिगर्भिणीभ्योऽसौ ।
एणीभ्यः कुशजालं
वितरति विततिस्तपस्वितनयानाम् ॥

(विमृश्य, समन्दहासं)

यज्जातिर्जगतिजनस्तज्जाति शिशुरपि तदाचरति
र्भवतीत्यवितथ एव लोकवादः ।

तथाहि-

ऋत्विक्पापठ्यमानान्मखविधिविहितानृग्यजुस्साममन्त्रा-
न्नाकर्ण्याकर्ण्यहर्षात्तदनुकृतिमभिव्यञ्जयन्तो निकामम् ।
तानेवाध्यापयन्तस्सहचरपरिषद्दत्तमिथ्यागुरुत्वाः-
प्रेक्ष्यन्ते स्मेरवक्त्रैरिहमुनिमिथुनैर्दारकाज्यैष्ठ्यभाजः ॥

मणिशेखरः -

शमधनपरिचर्या तत्परे शिष्यसार्धे
समिदुपहतिहेतोस्सामिसंस्पृष्टशाखे ।
लवनमसहमाना वर्धयित्र्यस्तरूणां
विदधति मुनिकन्याःपुष्पपेटीस्तदीयाः ॥

(अन्यतो विभाव्य)

राशीकृतानां वटुभिःफलानां
तरुच्युतानां सुहिताःकदल्याः ।
रोमन्थलोलोष्टपुरं च लाक्षं
वसन्ति कच्छेषु नव प्रसूनाः ॥

महाराजा ! इतोऽपि दीयतां दृष्टिः ।

स्फाटिक्यां भुवि कृत्रिमा सरिदियं गङ्गायते सङ्गता
कालिन्दीश्रियमाश्रयत्यपरतो माहेन्द्रनीलस्थले ।
धत्तेशोणरदछविं क्वचिदहो ताम्रोपलछायया
प्राशस्त्यं क्वचनप्रयागसरणेर्बध्नाति नानाश्मभिः ॥

देवसेनः – अहो तिरश्चामत्र निर्वैरता ।

कृच्छ्रोपनीतमुनिनन्दनदीयमान
नीवारतण्डुलभुजां हरिणीगणानाम् ।
दुग्धं धयंति मृगडिम्भमिलद्विलासा-
श्शार्दूलशाबकचयाः सह धेनुवत्सैः ॥

(पार्श्वतोऽवलोक्य साश्चर्यं)

निर्विकल्पकसमाधिनिद्रया
निर्मनो विषयवासनात्मनाम् ।
योगिनां तनुषु शृङ्गघट्टनं
शीलयन्ति पृषताश्शिला धिया ॥

कलावती – (सस्नेहबहुमानं) चंदिए ! इदो पेक्ख दावा ।

शिरालाहिंणिव्चव्ववदकिसदराहिंसविणअं
तणूहिं नाहाणंणअणि अममेत्तक्क घणिणं ।
हिदं काले काले विर अइदुमुव्लासभरिदा
समासंणेपव्वं पसवसमये मोणिमाहिला: ॥

[चन्द्रिके ! इतः पश्य तावत् ।

सिरालाभिर्नित्यव्रतकृशतराभिस्सविनयं
तनूभिर्नाधानां निजनियमात्रैकधनिनाम् ।
हितं काले काले विरचयितुमुल्लासभरिता-
स्समासन्नेपत्यप्रसवसमये मौनिमहिलाः ॥]

चन्द्रिका – सहि अणवसरेवि दुव्पहरो पदिव्वदाधव्मो जदा-

कंदमूल फलवक्त पाणिअं
मंदमंदगमणं पदेपदे ।

गव्भभार. धिइ भीरु मव्झमं
दंभकंठ परिपंड राणणं ॥
आदिहेअ विहि बव्धमाणसं
सास णुव्ण कुअ कुंभ वक्कलं ।
तापसं पिअदमा कदंबअं
खेदमोदजनअं विभाइ मे ॥
सखि ! अनवसरेऽपि दुष्परिहरः पतिव्रताधर्मः ।

यतः –

कन्दमूलफलपात्रपाणिकं मन्दमन्दगमनं पदे पदे ।
गर्भभारदति भीरुमध्यमं दर्भकाण्डपरिपाण्डराननम् ॥
आतिथेयविधिबद्धमानसं श्वासनुन्नकुचकुम्भवल्कलम् ।
तापसप्रियतमाकदम्बकं खेदमोदजनकं विभाति मे ॥

मणिशेखरः –

वसन्तकान्तागमनोत्सवोत्कया
वनान्तलक्ष्म्या नवगन्धपुष्पया ।
पुरः प्रक्लृप्ता इव दीपिकाङ्कुरा-
स्समिन्धते चम्पककोशमालिकाः ॥

राजा – (स्पर्शमभिनीय)

मलिम्लुचोऽयं बत ! मन्दयानः किञ्जल्कसम्मोहनचूर्णपुञ्जाम् ।
किरंछरीरेषु विलासिनीनांमुष्णणात्यहो मानधनं प्रसह्य ॥

कलावती – (सविलासं, परिक्रम्य) चंदिए पुरदो पव्लविदं कुसुमव्थवअंअदिमय़मोहरं पेव्ख एदं अवइणोमि ।
[चन्द्रिके ! पुरतः पल्लवितं कुसुमस्तबकमति-मनोहरं पश्य ! एतमपचिनोमि ।]

(इत्यपचयमभिनयति)

राजा – (सानुरागं)

स्मितमिलदधरश्रीचौर्यतस्सप्रसूनं
नवकिसलयजालं पाणिजैःकृन्ततीयम् ।
इति विरचितचौर्यास्त्वत्कचश्रेणिकान्ते-
श्चपलचपलरूपाश्चञ्चरीकाश्चरन्ति ॥

कलावती – (सस्मितमवनतमुखी तिष्ठति)

राजा – (सप्रेमानुबन्धं)

शिरीषपुष्पादपि सौकुमार्यं
वदन्ति कान्तावपुषः कवीन्द्राः ।
जिज्ञासमानाय तदाशु मह्यं
प्रयच्छ कान्ते ! परिरम्भलीलाम् ॥

(इति सत्वरमुपसृत्य, तस्याःकरपल्लवं स्पृशति)

कलावती – (सभयलज्जास्मितं, मन्दं मन्दमपसरति)

मणिशेखरः – (जनान्तिकं) देवसेन ! चिराय खलु ! पचेलिमं फलमस्मन्मनोरथद्रुमस्य यदनयो-र्मदनानुगृहीतयो र्व्यतिकरं रतिकरमवलोकयामः ।

(प्रकाशं)

मध्याह्नभास्करकठोरमयूखजाल-
सन्तापसञ्जनितघर्मपयःकणौघान् ।
निर्माष्टुमद्य करवाम वयं विहारान्
शैवालिनीषु सरसीषु च तत्र तत्र ॥

(इति राजकलावती वर्जमन्ये निष्क्रान्ताः)

राजा–

श्वेतछदाःकनकगौरि तवोपसन्ना-
मञ्जीरमञ्जुनिनदश्रवणोत्सुकत्वात् ।
धम्मिल्लकैतवघनाघनशङ्कयेव
निर्यान्ति पश्य सरसी सरणेरमुष्याः ॥

कलावती – अह्महे समुदग्गसाहालग्ग कुसुमग्गहण-
वग्गाए मह णाअणंमि पराओ णिवदिओ ।
[अहो समुदग्रशाखालग्नकुसुमग्रहव्यग्रायाः मम
नयने परागो निपतितः ।]

(इति तदपनिनीषयेव करपल्लवेन नयनमुन्मार्जयन्ती स्थिता)

राजा – (सत्वरमुत्सृत्य) अयि ! साहसि ! निस्थितवति
मयि किंकरं किं ते व्यवसितम् ।

(इति बलादिव तद्वदनमुन्नमय्य सफूत्कारं मुखमरुता तमपसारयन्निव वदनकमलमाधुरीमाजिघ्रन् हर्षातिशय-मभिनीय)

आसञ्जितं तवमुखेन मुखं यदक्ष्णो-
राश्वासने तदवलोकय .वनान्तलक्ष्मीः ।
ईर्ष्या कषायितविलोचनतामुपैति
क्रीडन्मधुव्रतजपाकुसुमछलेन ॥

(विभाव्य)

घर्माम्बुकणिकामृष्टकपोलतलकुङ्कुमम् ।
पुष्पापचयखिन्नाया स्पृहणीयमिदं मुखम् ॥

कलावती .- (सलज्जास्मितं मन्दं मन्दमपसरति)

राजा - (समन्मथव्यथमात्मगतं)

सभीपं नायाति प्रथममनुनीतापि बहुशो-
न गृह्णीते माल्यं पुलकिततनुर्नम्रवदना ।
पिधत्ते वक्षोजौ दृढतरपरिरम्भसमये
विमोहं रामा मे विरचयति सन्तापमपि च ॥

(सखेदमोदं)

सल्लापप्रवणे मयि प्रतिमुहुर्मौनं समालम्बते
वक्त्राम्भोजमवाञ्चयत्यभिमुखं स्वैरं सहासे पुनः ।
हारश्लाघनतत्परे च सुदृढं बध्नात्यसौ कञ्चुलीं-
धन्यःपश्यति चेष्टितानि विजने वामानि वामभ्रुवाम् ।

(प्रकाशं)

भ्रमद्भ्रमरिकागरुत्पवनवेगबृन्तश्लथ
प्रसूनदलराजिका रचिततल्पशोभादरी ।
वनप्रियवधूरवैरनिललोलपत्राङ्गुलि-
स्समाह्वयति नः प्रिये स्फुटमियं निनीषुश्रमम् ॥

(इति प्रसभं दरीं प्रवेश्य सविलासं)

पङ्केरुहाक्षिनलिनीदलवीजनाय
क्षिप्रं मयि स्पृहयति स्वयमीर्ष्य एव ।
आचामति श्रमपयःकणमाननोत्थ-
माबिभ्रदम्बुजमधून्यनिलाङ्कुरस्ते ॥

(सचमत्कारं)

अमृतं व्ययमेष्यतीति किं मधुरालापिनि ! मादृशे जने ।
अधरोष्ठपुटं विचाल्यते न भवत्या नवविद्रुमोपमम् ॥

कलावती - (बलादपसर्तुमिच्छति)

राजा -सुन्दरि ! किमकस्मादपसरसि ।

कलावती - (सस्मितापाङ्गवीक्षणं) अ अ उत्त ओदंस मल्ल-
जोग्गाइकुसुमाइ गह्निअ पुणोवि आगमिस्सं ।
[आर्यपुत्रावतंसमाल्ययोग्यानि कुसुमानि गृहीत्वा
पुनरप्यागमिष्यामि ।]

राजा -

गृह्णासि तन्वि मृदुना करपल्लवेन
कस्मादमूनि कुसुमान्यतिकर्कशानि ।
मन्दस्मितं सुदति माल्यतिनीलपद्म-
कर्णावतंसति कटाक्षमयूखजालाम् ॥

कलावती - (साभ्यर्थनं) अअउत्त दरीबहिरप्पदेसे
खणामेत्तं संचरिदुं वांछइ मह मणं ।
[आर्य पुत्र ! दरीबहिःप्रदेशे क्षणमात्रं सञ्चरितुं
वाञ्छति मम मनः ।]

राजा - (साकूतं)

आधातव्यं स्याच्चेदाधेहि ममोरसि स्वैरम् ।
अतिमृदुलं पदयुगलं ममादध्या महीतले कठिने ॥

कलावती - (सव्रीलं) अ अ उत्त ण हु एआरिसस्स
अवराहस्स भाअणी होम्मि ।

[आर्यपुत्र ! न खल्वेतादृशस्यापराधस्यभाजनी भवामि ।]

राजा –तर्हि,

लाक्षारसाम्रेडितरक्तभावं द्राक्षाधरे पादयुगं तवेदम् ।
प्रवालतुल्यं पवनावधूतप्रसूनक्लृप्ते शयने निधेहि ॥
न मनो निधातुमस्मिन् ननु यदि किसलयारुणं चरणम् ।
आजानं दासरचिते मृदुदलशयने तनुष्व सविलासम् ॥

(इति कथमप्युपवेश्य श्रममभिनयति)

कलावती – (सविनयस्मितं) पदिव्वदाणं पाणवल्लह पादसंवाहणादिअं परमधंम्मोत्ति सुणीअदि अहंवि तंकादुअहिलसामि ।
[पतिव्रतानां पादसंवाहनादिकं परमधर्म इति श्रूयते अहमपि तत्कर्तुमभिलषामि ।]

राजा – कलभाषिणि ! मामैवम् ।
उत्सङ्गे विनिवेश्य–
त्वामहमिच्छामि पूजयितुम् ।
कामकलाभिः केयं–
पूजकपूजा तवाद्य पूज्यायाः ॥

(सोल्लासं)
परिचर्यापरायणं यदि तव मानसं
सरोजमधुगन्धिलोप्यधिकमेषमन्दानिलः–
पटीरतरुवाटिका परिगतोऽप्यकिञ्चित्करः ।
शमन्नयमृगीमदछुरणवासनामेदुरैः–

श्रमाम्बुकणजालकं कुचद्धुकूलवाताङ्कुरैः ॥

(सप्रणयानुबन्धं)

घनसारगन्धसार द्रवशशिमणिभूमिकुसुमशयनैःकिम् ।
सन्तापशान्तयेऽलं शीतलकुचकुम्भगाढपरिरम्भः ॥

(इति दृढतरमुपगूह्य सुखपारवश्यमभिनयन्)

सरजसमधुमाधुरीधुरीणं शिशिरमनाविलमन्यदम्बुनालम् ।
शमयतुमधुनोत्थितामुदन्या मधुरसुधारसमाशु देहि मह्यम् ॥

(इत्यधरबिम्बमास्वादयितुमिच्छति)

कलावती - नाट्येन परिहृत्य निर्जिगमिषति ।

राजा - (सविषादमात्मगतं)

सरभसपरिकृष्टेनांशुकेनावृताङ्गं
नियमितकुचभारं दिक्षुनिर्यत्कटाक्षम् ।
किसलय शयनीयादाशु निर्गन्तुकामा
किमपि किमपि चित्ते कीरवाणी निधत्ते ॥

कलावती - (नकिञ्चिदुक्त्वा प्रस्थितैव)

राजा - (सानुनयमनुसरन्)

परिणतिमुपयाते वासरे निम्नगानां
तटभुविजलवातैस्सेव्यमानौ विहृत्य ।
कुलपतिगृहमावां हन्त या यावसायं
सुतनु कथमिदानीमातपे निर्जिहीषे ॥

कलावती - (सावेगं) सहीणं सआसं गच्छम्मि ।

[सख्योः सकाशं गच्छामि ।]

[इति निष्क्रान्ता]

राजा –(दीर्घमुष्णं विनिश्वस्य, क्षणमात्रं तत्र स्थित्वा बहिर्निर्गत्य परितःसदृष्टिक्षेपं)

द्रुतकनकनिभाङ्गी दुर्निरीक्षाः स्फुरन्ती
प्रणयभवरुषा सा भामिनी पश्यतो मे ।
प्रतिदिशमतिवेलं भासयन्त्यात्मभासा
क्षणरुचिरिव मेधे क्वापि लीना वनेऽस्मिन् ।

[नेपथ्ये]

हन्त ! हन्त ! कैषा योषामणी शशिकलेव विशाखाभ्यां सह सखीभ्यामप्रविष्ठपुनर्निर्गमममनुष्यसञ्चारं सिद्धयोगितपोवनं प्रविष्टा ।

राजा –(आकर्ण्य, सखेदसम्भ्रमम्)

प्रणयकोपवशेन पराङ्मुखी प्रयतनं पदयोः परिसान्त्वनम् ।
अविगणय्य गता पुनरागमं शिवशिवाद्य शिरोलिपिरीदृशी ॥

(विचिन्त्य)

उपायैरिष्टानां सुनयनिरपायैर्मतिमतां
वियोगः प्रेयस्या स हि युधिजयेनाप्यपगतः ।
महाधीरप्रज्ञाभुजबलविदूरीकृतिविधा
पटुर्निसीमत्वात्कटुरहह सह्यः कथमयम् ॥

(सोपालम्भं)

क्षणरुचिशशिबिम्बव्योमबिम्बालिकम्बु
हृदसरसिजरम्भाकुन्तशैवालकुम्भान् ।
असृजदपघनानां स्मारकान्प्रेयसीनां
विधिरहह ! न किञ्चित्प्रापकं पान्थवैरी ॥

(पुनर्दरीं प्रविश्य, सनिर्वेदं)

द्रवद्विधुदृषंनदीदलितमौक्तिकश्रेणिका
तुषारजलसारिणी तुहिनभानुरश्मिछटा ।
दरीयमभवत्पुरा मम हि वल्लभा सन्निधा-
वहो बत कुकूलवद्दहति सैव मांसं प्रति ॥

तदहमेकाकी कियन्तं कालं प्रियतमाविरहखेदं सहिष्ये ।

(लतागृहान्निर्गत्य, परितो विलोक्य) हन्त ! परिणतप्रायो दिवसः सम्प्रति समसुखदुःखै-स्सहचरैः समारचित शिशिरोपचारविधिः । कथं कथमपि कालमति वाहयामि ।

[इति निष्क्रान्तः]

[शुद्धविष्कम्भः]

॥ षष्ठोऽङ्कस्समाप्तः ॥

।। सप्तमोऽङ्कः ।।

[ततः प्रविशति तापसी]

तापसी–आदिष्टाऽऽस्मि, भगवता गुरुणा सिद्धयोगिना । वत्से ! दयावति ! प्रबलबलावलेपपारीन्द्र-निबर्हणेन मम सख्युस्त्रिकालवेदिनः परमान्तरङ्गस्य नन्दकमहीपालस्य दाराः कलावती नाम सहचरीभ्यां वनविहारकौतूहलेन निर्मनुष्यसञ्चारमस्मतपोवनं प्रविष्टाः सादरं त्वया रक्षणीया इति । एतावन्तं समयं तैस्तै-र्वचोभिस्तामाश्वास्य माध्यन्दिननियमकृत-विलम्बया मया तत्प्रवृत्तिजिज्ञासया प्रहितान-मभिलषति योगिनी ।

[प्रविश्य]

योगिनी – जयतु ! स्वामिनी ।

दयावती – अपि नाम वत्सा सह्यवेदना ।

योगिनी – (सपरितापं) आर्ये ! किं ब्रवीमि । दुर्निरूपः-खलु तस्या दयाविशेषः ।

स्मराजलशिखावली कबलितान्तरङ्गत्वतः-
परिक्वथितचन्दने कुचतटे कुरङ्गीदृशः ।
प्रपुष्यति हि दीपतां . स्फुटितहारमुक्तारज-
स्समर्मररवंसरोरुहदलावली शुष्यति ।।

किञ्च –

सहकारवनेषु यः पुरा
सरसःकोकिलपञ्चमध्वनिः ।
अमृतं समसिञ्चदङ्गना
श्रवणे त्वद्य विषं किरत्यसौ ॥

अपि च –

न निद्रामभ्येति ग्रहविहतचित्तेव सुतनु-
र्विवर्णाङ्गी तारादिव समुखशान्तार्चिरिव सा ।
न जानीते दृश्यं सकलमुपकण्ठेऽपि सुमनो-
मनोवृत्तिः सच्चित्सुखवपुषि भूम्नीव निहिता ॥

दयावती – युक्तमेवैतत् । यत्तादृशप्रेमभरिता तदीया चित्तवृत्तिः । निरन्तरप्राणेश्वरभावनापरतया न विषयान्तरग्राहिणीति । ततस्ततः ।

योगिनी – (सनिश्वासं)

त्यक्त्वाहारकथामुनीन्द्रललनासङ्गादिवात्मेश्वरं
निध्यातुं स्पृहयालुतामिव गतानक्तंदिवंजाग्रती ।
मौखर्यादपराधिनीरिव रते भूषासमुज्झत्यसौ
वारीधुर्यहतेरिवाद्य न शृणोत्यारामकी गिरः ॥

(सबाष्पगद्गदं)

निःश्वासमारुतसखःकुसुमास्त्रवह्निः-
स्तस्या मनोमयवनं दहति स्वतोऽपि ।
आनीयते बहिरिवालिकराग्रलीला-
दोधूयमान नलिनीदलतालवृन्दैः ॥

किं बहुना -

कर्पूरपूरितहिमोदकबिन्दुसिक्त-
पाटीरपङ्कपरिचर्चितगात्रयष्टिः ।
मोमुह्यते सहचरीपरीकीर्णपुष्प-
पुञ्जस्थितापि विरहानलविह्वलाङ्गी ॥

(सविमर्शं)

प्रकृत्या सकुमाराङ्गी प्रतप्ता मदनाग्निना ।
नातःपरतरं किञ्चिद्विरहार्तिं सहिष्यते ॥

दयावती - (सधैर्यसन्तोषं)

दौर्मनस्यमिदं तस्याः दुर्निवारं सुरासुरैः ।
त्रिकालवेदी कृपया शुभोदर्कं भविष्यति ॥

योगिनी - (स्मरणमभिनीय, सनिर्वेदं)

अव्याजसुन्दराङ्गीं तन्वीं राजा वियुज्य मदनार्तः ।
कुत्रास्ते किं कुरुते धत्ते प्राणान्कथं न जानामि ॥

दयावती -

वियुक्तः प्रेयस्या वनगिरिनदीप्रान्तभुवि तां
विचिन्वन्सम्पृच्छन्विहगमृगसालानुपसरन् ।
चिराद्दृष्टस्स्निग्धैःप्रकृतिमथनीतःश्रमहरै-
रुपायैस्सन्तापं दृढमपनिनीषुर्विचरति ॥

तदेहि सत्वरं तामाश्वासयितुमाश्रमेव गछावः।

[इति निष्क्रान्ते]

[शुद्धविष्कम्भः]

[ततः प्रविशति यथा निर्दिष्टव्यापारो राजा]

राजा – (सपरितापं)

करिकलभकरोरुः कामपि म्लानिमङ्गे
मदनकदनकेल्या द्राङ्गिरूढां दधाना ।
मुदमुदसृजदक्ष्णोर्या प्रविष्टा वनान्तं
विरहकृशतराङ्गीं विह्वलस्तां स्मरामि ॥

(ससन्तोषं)

सामुद्रिकाङ्कनपरीक्षणकैतवेन-
हस्ताम्बुजिस्पृशि मयि प्रमदाललाम्नः ।
तत्कालकङ्कणझणत्करणानुकारी
याति श्रुतिं भ्रमरिकाकलनाद एषः ॥

(सदैन्यं)

वासन्तिका व्रतति मञ्जुलकुञ्जपुञ्ज-
गुंजन्मिलिन्दपटली मुखरीकृताशम् ।
वासन्तिकं दिनमिमं जनमङ्गजार्त्तं
सन्तर्जयत्यनिललोलदलाङ्गुलीव ॥

(विचिन्त्य)

आविर्भवन्तमनुरागमिवान्तरङ्गा-
दाबिभ्रतीं कुचतटे घुसृणाङ्गरागम् ।
दक्कैरवामृतकरायितमन्दहासा-
मद्यापि तां धुरिगतामवलोकयामि ॥

(स्मरणमभिनीय, सरोमाञ्चं, स्वगतं). तदानीं खलु ।

किसलयसुकुमारं पाणिमेणीक्षणाया-
मुरसिनिहितवत्यां मामके कामतप्ते ।
सपदि पुलकपालीकल्पितःकोऽप्यनल्पः-
स्मररणसहकारी कञ्चुकः प्रादुरासीत् ॥

देवसेनः – इदमग्रे कदलीवनं दृश्यते ।

राजा –(पुरोऽवलोक्य, सकौतुकं)

उत्तप्तकाञ्चनमरीचिमुषां फलाना-
मानम्रतामुपगतानिवहैःकदल्यः ।
मन्दानिलप्रचलिताग्रदलाङ्गुलीभि-
राकारयन्ति ननु न स्पुटमिङ्गितज्ञाः ॥

(कदलीवनप्रवेशमभिनीय) परिरभ्य कदली-काण्डप्रकाण्डम् । अहो ! अतिमात्रं निर्वृणोति मे गात्रम् ।

(एतादृशी कथमेतस्य निर्वृतिजनकता ? विभाव्य आः स्मृतम्)

ध्रुवमियं कदलीघनशीतला हृतवती वनितोरुयुगश्रियम् ।
वितनुते चकितेव तदागसा प्रियतमोरुविमिश्रणनिर्वृतिम् ॥

देवसेनः – एषा पुरस्स्फुरति स्फुटनलिनपरिमलमिल-दलिनी नलिनी ।

[सर्वे सरस्तीरमुपसरन्ति]

लहरी कलिकासमूहवाही मरुदाविभ्रदयं मरन्दबिन्दून् ।
कुरुते श्रमनोदनं मृगाक्षी कुचचेलाञ्चलमारुतानुकारी ॥

(अन्यतो निरीक्ष्य)

उरसिरुहयुग्मसम्पद्धरणचणं चक्रमिथुनमब्जाक्ष्याः ।
वितथीकरोति दृष्टिमास्माकीनां निजोड्डीनैः ॥

(सरो दृष्ट्वा, सरोषं)

जलाशयानुबन्धेन कञ्जरीटादृशोदृशोः ।
सौभाग्यमपहृत्यायं शफरः सम्प्रवल्गति ॥

मणिशेखरः - (अपवार्य)

देवसेनः - दुर्वारविरहव्यापारनिरतमानसमेनं
कथान्तरं प्रस्तुत्य तदुन्मुखीकुर्वः ।

(प्रकाशं)

हन्त ! सायं समयस्सम्प्रवृत्तः ।

दिनकररथनद्धघोटकानां सरभसमम्बरतोऽवरोहभाजाम् ।
खुरपुटदलितास्तधातुधूली विसरइवोल्लसतीह सान्ध्यरागः ॥

राजा -

दिवसावसानसमयश्रीरेषासान्ध्यपरागौराङ्गी ।
रथचरणविहगविरहज्वलनशिखाभासते नूनम् ॥

(निरूप्य)

वरुणाशाविलासिन्याः सन्ध्यारुणघनछटा ।
निबध्यमानामाणिक्यकञ्चुलीव प्रकाशते ॥

देवसेनः -

यातेस्तं तरणावनाश्रयतया भ्रान्त्वा मयूखावलि-
र्मीलद्रक्तसरोरुहेष्वरुणिमव्याजेन संलीयते ।
प्रातर्लीनमथस्फुटत्कुवलयं व्यूहोदरान्नीलता
लक्ष्येणाति विशृङ्खलप्रसरणं निर्याति सान्द्रं तमः ॥

(अन्यतो दृष्ट्वा)

गायत्रीं त्रिपदामुपास्य मुनयस्त्वातारकादर्शनं
द्रागेते धृतदर्भविष्टरमहाव्याघ्राजिनाछादनाः ।
हस्तोदस्तनवाम्बुपूर्णकरका मन्दानिलान्दोलित-
प्रावाराञ्चलसंवृतानुगमृगव्यूहा विशन्त्याश्रमान् ॥

(विष्वगालोक्य)

हन्ताभिसारिकाणांकान्तनिधिप्राप्तिकारणं किमपि ।
सिद्धाञ्जनं तमिस्रं विलोचनानामिदं मन्ये ॥
तारापथे शरावे सन्ध्यारागाश्रयाशसन्तप्ते ।
भर्जनसमयविकीर्णा लाजा इव तारकाभान्ति ॥

मणिशेखरः (श्रवणमभिनीय)

दिग्विजयोद्यतमदनप्रस्थानारम्भसूचनादक्षः ।
कञ्चुकिकुलकलकल इव कर्णानन्दं करोति विहगरवः ॥

राजा-

सन्ध्या नानटयमानप्रमथयति जटाजूटकां तारवीथी-
दीव्यद्दिव्यस्रवन्ती तरलतरतरङ्गोत्थिताः शीकरा वा ।
ताराःपुष्पोपहारा इव रजनिवधूसज्जिताश्चन्द्रमोऽर्थं
भासन्ते संविकीर्णाविमघव इव सद्धर्मदन्तावलस्य ॥

अपि च–

अम्बराङ्गणमहापणान्तरे कालनैगमपरिप्रसारिताः ।
तारकानिकरमौक्तिकव्रजाःकुर्वते मम विलोचनोत्सवम् ॥

विद्ध्यण्डाम्बुजिनीमरुत्पथदलप्रोद्भासिताम्भःकणा–
रूढाध्वान्तनिषद्वरे मनसिजक्ष्मापालकीर्त्यङ्कुराः ।
स्त्रीमानोरगदूरसारणकलानिष्णातकालोरग–
ग्राहिप्रेरितवालुकाश्चगगनद्रोःकोरकास्तारकाः ॥

मणिशेखरः – साम्प्रतमुदेष्यति भगवन् । कैरविणी–
परिणीर्दाक्षायणीरमणचूडामणिः ।

यतः –

पूर्वक्ष्माधरशृङ्गगैरिकरजांस्युद्धिद्यविश्वंभरा–
मुन्मग्ना भुजगान्वयाधिपफणा माणिक्यतेजोऽङ्कुराः ।
सन्नद्धस्मरचापमुक्तविततशोकानलास्त्रव्रजा–
द्योताःकेचन तप्तहाटकनिभाः प्राचीं परिष्कुर्वते ॥

किञ्च –

तिमिरविपिनपाली दीप्तदावानलश्री–
रुदयगिरिकिरातीमञ्जुगुञ्जावलीयम् ।
विरहदलितकोकी हृद्विनिष्कीर्यमाण–
क्षतजलहरिरेखा कापि शोभा विभाति ॥

देवसेनः –

नवजपाकुसुमस्तबकछविःप्रविलसन्त्यमृतद्युतिमण्डलम् ।
अरुणतन्तुविनिर्मितकन्दुकभ्रमविधानचणं गगनश्रियः ॥

(क्षणं निर्वर्ण्य)

अम्बरे कुमुदकौतुकहेतु श्शम्बरारिधरणीपरिणेतुः ।
पुण्डरीकमिव पूर्णसुधारुकमण्डलं मम पुरोमहिदिन्धे ॥

(सोल्लालं)

नीलारविन्ददलसुन्दरधाम्नि येय-
माकाशसीम्नि रजनीकररश्मिमाला ।
संलक्ष्यते गरुडकेतनदेहसक्ता-
मुक्तावलीव जनलोचनमेदिनी सा ॥

(सस्मितं)

अभिनवाभ्युदयस्य निशापतेः करविमर्शवशात्ककुभामिव ।
विगलितंजघनस्थलतांशुकं स्फुरति मेचकमन्मथितं तमः॥

(सर्वतोऽवलोक्य सानन्दं)

नभःशमनसोदरीलहरिकामिलज्जाह्ववी
स्मरक्षितिपचामरं भुवनसिन्धुफेनच्छटा ।
समस्तहरिदङ्गनाकुचतटीपटीराङ्कनं
मुदं वितनुते दृशोर्मम विसृत्वरीचन्द्रिका ॥

राजा – (सप्रत्याशं)

झङ्कुर्वद्भिर्मधुकरकुलैर्व्यक्तमञ्जीरशिञ्जां
नेत्रोदश्चत्प्रमदसलिलां निर्गलद्भिर्मरन्दैः ।
तारानाथो नवकुमुदिनीं कौमुदी चारुहासां
प्रेमाधिक्यात्सुखयतितरां द्राक्करस्पर्शनेन ॥

(सानुरागं)

रजनिरियमुदीतचन्द्रवक्त्रा.
परिहितनिर्मलचन्द्रिकादुकूला ।
उडुगणनवमौक्तिकस्रगाढ्या
जनयति मोदमिवाक्ष्ण्या ससर्ज ॥

(विमृश्य, सव्यथं)

मरुद्व्यजनवीजितो मधुकरावलीधूमितः-
प्रकीर्णतरतारकापटलविष्फुलिङ्गछटः ।
पिकारवसमुन्मिषच्चटचटध्व निःप्लोषयत्य-
योगिसमिधः शशिज्वलनउस्रहेतिव्रजैः ॥

हन्त ! हन्त !

उत्तेजितात्स्मृतिभुवा नवमल्लिबाणा-
छाणोपले कुमुदबान्धवमण्डलाख्ये ।
रश्मिछलेन निपतन्ति रजांसि नूनं
देहे वहन्ति मम मुर्मरचूर्णभावम् ॥

(सकातर्यातिरेकं)

आकार्णाकृष्टसृष्टन्क्षिपतिहृदयभूराशुगान्नन्तरङ्गैः-
प्रालेयांशुश्शरीरे किरति बत करान्पावकास्त्राग्रजातान् ।
आरावान्पातयन्ति श्रवसि कलागिरस्ताम्रनाराचकल्पान् -
हाहा कर्तास्मि किन्नु व्यथयति नितरामेषमन्दानिलोऽपि ॥

(स्मरणमभिनीय, सास्रं)

रजनिकरकरानलाभितापलापितविसंस्थूलवेपमानगात्री ।
रणरणकवती रतीश्वरार्त्ताचिरविरहं सहते कथं नु तन्वी ॥

(चिरं विमृश्य सधैर्यावष्टम्भं)

विभेदने वियोगस्य नालं शक्तित्रयं मम ।
तपोबलविभूमैव तापसेन्द्रस्य पारयेत् ॥

[प्रविश्य]

तापसः – (पुरोऽवलोक्य, सकरुणं)

त्रिभिरपि सचिवाद्यैस्सादरं सेव्यमानः-
परिमितमुखकान्तिःकान्तयात्यक्तपार्श्वः ।
रविपवनसुमित्रानन्दनैर्वन्ध्यमानो-
रघुपतिरिव भाति प्राप्तसीतावियोगः ॥

राजा – (तापसं दृष्ट्वा, सरभसं, साञ्जलिबन्धमुपसरति)

तापसः – विजयतां महाराजः ।

राजा – भगवन्! भवदागमनं कार्यगौरवमनुमापयति ।

तापसः – योगबलेन प्रत्यक्षीकृतयुष्मदीय वृत्तान्त-कुलपतिराज्ञापयति । वियोगिजनसङ्घटनपटीयसि नेदीयसि फले विरहवेदना किमर्थमनुभूयत इति ।

(सर्वे श्रुत्वा हर्षातिशयं नाटयन्ति)

तापसः – भगवतः कुलपतेरग्निहोत्रं जुह्वतः परिचरणाय साधयामि ।

[इति निष्क्रान्तः]

विदूषकः – (सकरास्फालनं, विहस्य) मणिसेहर एव्वं विहेसु कव्जेसु अणाग अविहाणसामव्छं बहुसो

अणुहूअ सव्ववण्णं मण्णेण महाराएण पुव्वं एव्व मंतिसेहरोव्ति किदणामदे ओतुमं एव्वं विह परिदेवणवसरंमिवि कंठं गदचामीअरण्णाएण हत्थिदं विण्णादुं भवारअंतो अह्मेहिं समं रुदंतो चिट्ठसि जदि एव्वं वेदेणग्गहणेवि विह्मरणसीलदा तदा णत्थि तुउ दोसो ।

[मणिशेखर ! एवं विधेषुकार्येषु अनागत-विधानसामर्थ्यं बहुशोऽनुभूय सर्वज्ञं मन्येन महाराजेन पूर्वमेव मन्त्रिशेखर इति कृत-नामधेयस्त्वं एवं विधपरिदेवनावसरेऽपि कण्ठगतचामीकरन्यायेन हस्तस्थितमपि विज्ञातुमपारयन्नस्माभिः समं रुदन् तिष्ठसि । यद्येवं वेतनग्रहणेऽपि विस्मरणशीलता तदा नास्ति त्वयि दोषः ।]

मणिशेखरः –सर्वसाधारणमिदं प्रज्ञाशैथिलम् ।

विदूषकः – ही ही कं पदारेसि । सव्वप्पअरेणवि अह्मेसुणिक्खित्त एतकज्जभरो पिअदमाविओएण पमुद्धअरो अवि आरणिज्जचरिओ महाराओ । देव्वसेणस्स बाहुबलं मह वाआबलं तुह उणबुद्धिबलं एसोदोसो कहिंणिवहिओ ।

[ही ही कं प्रतारयसि सर्वप्रकारेणापि अस्मासु निक्षिप्तकार्यभरः प्रियतमावियोगेन प्रमुग्धतरः

अविचारणीयचरितो महाराजः । देवसेनस्य बाहुबलं मम वाचाबलं तव पुनर्बुद्धिबलं एष दोषः कस्मिन्निपतितः ।]

राजा – (सौत्सुक्यं) अलमलमुत्तरोत्तरेण । मणिशेखर ! झटित्युपनय फलजातम् ।

मणिशेखरः – तथा (इति निष्क्रम्य सत्वरमुपकारिका-कुटीरनिहितं फलजातमादाय प्रविश्य राज्ञे प्रदर्शयति ।)

राजा – (सरभसं गृह्णाति)

[नेपथ्ये]

तारा किं तपसःपरीक्षयवशात्तारापथप्रच्युता ।
विद्युत्किञ्चिरदीप्तितामुपगतामेघोदरान्निर्गता ।
निर्याता किमुतापिता सशिकलाशम्भोर्ललाटाग्निना-
देवी किं ? क्षितिचारकौतुकवती कैषानुयोषामणिः ॥

(सर्वे सविस्मयमाकर्णयन्ति)

विदूषकः – (सहर्षं) भो वयस्स सव्वं कलावदी एव्व रूवादिसअ दंसणविह्म यजणिदं भमेण केणवि वणअरजणेणणाणाविहाए उत्पेखिव्जइ ।

[भो ! वयस्य ! सर्वं कलावत्येन रूपातिशय-दर्शनविस्मयजनितभ्रमेण केनापि वनचरजनेन-नानाविधया उत्प्रेक्ष्यते ।]

राजा – सर्वाः स्वार्थं समीहित इत्युक्तिं प्रकटयन्ति । कति कति न सन्ति रूपविशेषमनोहारिण्यः काननचरिण्यः शबररमण्यः । केन सैवेति-निर्णीयते ।

विदूषकः– फलसण्णिहाणाणंनरिव्जेण ।
[फलसन्निधानाऽऽनन्तर्येण ।]

राजा –जोषमास्ते ।

मणिशेखरः – नमिथ्या मुनिभाषितमिति वचनेन चेति वक्तव्यम् ।

राजा – (सशिरःकम्पं) तत्तु वरं (घ्राणं श्रवणं चाभिनीय)
कस्तूरीघनसारसौरभवहो मन्दानिलःस्पन्दते
सल्लापः कलकोकिलारवगुरुर्दूरे समाकर्ण्यते ।
हंसीनादसहोदरःश्रुतिसुखं मञ्जीरघोषोऽपि नः
(साश्रुस्तम्भविषादमभिनयन्) लोकान्तरगतायाः इव तस्याः कुतः पुनरागमप्रत्याशा ॥
(क्षणं विचिन्त्य,सहर्षातिशयं, निमितं सूचयन्)
श्रेयःप्राप्तमिवैषशंसतिमुहुर्बाहुस्फुरन्दक्षिणः ॥

पुनस्तत्रैव –
विधुंतुदग्रस्त विमुक्तचन्द्रमः प्रसारिकान्तिःकुमुदाकरं यथा ।
तथागतास्माद्विपिनात्कलावती प्रियं नृपं नन्दय नन्दकाभिधम्॥

(श्रुत्वा सानन्दं) सत्यमागच्छति प्रियतमा यदामन्त्रस्य विनिर्गतामेनामित्थमनुशासतीव

तपस्विन्यः।(सप्रत्याशं.नेपथ्याभिमुखस्तिष्ठति)
[ततः प्रविशति चन्द्रिका बुद्धिमतीभ्यां सह सविलासगमना कलावती]

कलावती –(सहर्षं) हला सहिओ पुराकिदव्स पुव्णव्स एसो दिवसो पलसमिद्धिए वै जणणो जदो दुव्मोओदो वणादो णिव्मुक्ता अअउक्तं दक्खिव्सं ।

[हला सख्यौ पुराकृतस्य पुण्यस्य एष दिवसः । फलसमृद्ध्या वै जननः । यतो दुर्मोचाद्धनान्निर्मुक्तार्यपुत्रं द्रक्ष्यामि ।]

(विचिन्त्य, सानुशयं) पघादकिदेण पणअकलहेण अहं अअउक्तो इक्तिअं कालं परुसदरविरहवेदणं अणुहुदवंता ।

[प्रमादकृतेन प्रणयकलहेन अहमार्यपुत्रश्च इयन्तं कालं परुषतरविरहवेदनामनुभवन्ती ।]

सख्यौ – (सपरिहासं) छुहाअं अधिअदाविअ भोअणे रुइविसेसं विरहन्मि तिव्ववाद्यो सुहादिसअं उव्पादेइ ।

[क्षुधायामधिकृतेव भोजने रुचिविशेषं विरहे तीव्रबाधः सुखातिशयं उत्पादयति ।]

कलावती – (सस्मितं लज्जते)

राजा – (विलोक्य, सप्रमोदं)

उपसरति सह सखीभ्यां जीवयितुं मामियं सरोजाक्षी ।
जीवितकलेव पुरुषं मत्या सह चित्तवृत्या च ॥

कलावती - (राजानं विलोक्य, सात्मोपालम्भं)

एसो अअउव्तो अघव्णाए मह विव्सेस-दुव्खाणुभवेण पहाअराआससंको विअ परिव्खामपंडरो दीसइ णिव्घिणा अहं कहंणं उवसव्पंमि ।

[एष आर्यपुत्रः अधन्याया मम विश्लेषदुःखानुभवेन प्रभातराकाशशाङ्क इवपरिक्षामपाण्डरो दृश्यते । निर्धृणा अहं कथं एंनमुपसर्पामि ।]

(इति विलम्बमानोवतिष्ठते)

सख्यौ - (बलादिवैनां राजसन्निधिं नीत्वा) जेदुदेव्वो ।

(जयतु देवः)

राजा - (समनोविकासं)

अयि ! भीरुमन्मथशिखि ज्वालाशमनाय देहिपरिरम्भम् ।
तृषितं नयनचकोरं नन्दय मुखचन्द्रचन्द्रिकया ॥

कलावती - (सलज्जास्मितं) अकालणकुविदाए मए अअउव्तचलणेसु अवरव्धंति भणिदुंवि ण परिमि ।

[अकारणकुपितया मया आर्यपुत्र चरणंयो-रपराद्धमिति भणितुमपि न पारयामि ।]

राजा – मैवं वादीः ।

भवितव्यतैव लोके तनुते जन्तोश्शुभाशुभे नियतम्।
सुन्दरि ! वियोगयोगौ पश्यत वेमावर्किंतोपनतौ ॥

मणिशेखरः – राजन् ! दिष्टचाद्य वर्धामहे । इतराश्चर्यतपश्चर्याभुवः परमस्मदखिलसम्पत्प्रतिभुवस्त्रिकालवेदिनस्तापसकेतुरतिक्रामति । सायमग्निहोत्रदर्शनवेला । ततः सत्वरमस्माभिर्यातव्यम् ।

राजा – (सर्वैस्सममाश्रमप्रवेशं नाटयति)

मणिशेखरः – (परितोऽवलोक्य, सकुतूहलं)

प्रवेष्टुकामाज्वलनं मयूखा-
स्सौरास्समुद्वीक्ष्य मुनीं शुचीं च ।
अत्योन्य साम्यादिव सन्दिहाना
दीपाभिधाना निवसन्ति तूष्णीम् ॥

तिमिरद्विषदुद्भवाद्भया
दभयंप्राप्य तपोधनालयम् ।
वहते किमु निश्चलस्थितिं-
रविरश्मिर्निशिदीपकैतवात् ॥

देवसेनः – (साङ्गुलिनिर्देशं)

जगज्जयधृतोत्साहमकरध्वजभूभृतः ।
प्रदीपाग्रमषी भाति छुरिकाकनकत्सरुः ॥

मणिशेखरः –(सर्वतो दृष्टिं प्रसार्य)

एताःप्रत्युटजं मुनीन्द्रवनिता नित्यात्मपूजाविधा
सन्तुष्यन्मनसा समर्पितमिव त्रेधाग्निना बिभ्रते ।
नेत्रेष्वञ्जनमुत्पलं श्रुतिषु च व्याकीर्णधूमच्छला-
न्मुक्ताहारचयं श्रमाम्बुकणिकाव्याजेन वक्षस्थले ॥

अहो मुनीनामसीमा महिमा ।

फणोज्वलमणीगणान् फणधरान्गृहीत्वा मुखै-
श्चरन्ति धुरि केकिनस्तत इतो मुनीन्द्राश्रमे ।
गतागतजुषां नृणामुटजसीम्नि वामभ्रुवां
प्रदीपविलसत्कराःपरिजना इव तेऽद्भुतम् ॥

(सर्वे कुलपतेरग्निशरणमुपसरन्ति)

राजा – (सादराश्चर्यविनयं)

प्राच्या मीमांस एव प्रकटितमहिमामूर्तिमानत्रवेद-
स्साकं गेहे गृहिण्या रकिचरणजुषा योगिनामग्रगण्यः।
पुण्यःकारुण्यसीमा शिवतममृतश्रीरुपास्तेऽग्निहोत्रं-
साक्षात्स्वाहाऽऽद्वितीयःपवनसख इव ब्रह्मवित्सार्वभौमः ॥

किञ्च –

पिशङ्गीभिस्सोऽयं प्रविततजटाजूटरुचिभि-
र्वितानाग्निज्वालावलयमनुकुर्वन्मुनि वृषा ।
पुरःपश्चाच्छिष्यैस्सपदि परिवीतोऽग्निशरणा-
त्समासन्नानस्मान्स्वयमनुजिघृक्षुर्विचलति ॥

(सर्वैस्सह साञ्जलिबन्धं)

कृतत्रेधा नमस्कारो निर्द्धापरमतिस्सदा ।
निष्कलिःकल्पतामेषभूयसे श्रेयसे मुनिः ॥

[ततः प्रविशति यथा निर्दिष्टस्त्रिकालवेदी]

राजा - (पुरोऽवलोक्य, सहर्षं)
चिरकाल विप्रयुक्तौ-
संयुक्तौ सानुयायिनौ पश्चात् ।
पौलोमी पुरुहूता-
विव भातो दम्पती एतौ ॥

राजा - (सप्रश्रयं, सर्वैस्समुपसृत्य यथोचितमाचरति)

त्रिकालवेदी - (सानुग्रहं) राजन्यशिखामणे !

चतुस्समुद्रीदतभूतधात्री
साम्राज्यभाजस्तवपादपीठाम् ।
सेवाऽऽवनम्रक्षितिपालमौलि-
रत्नांशुनीराजितमस्तु नित्यम् ॥

राजा– अमोघाशिषः खल्वत्र भवन्तः ।

त्रिकालवेदी – अतिशक्रपराक्रमयथाक्रममाश्रमेषु क्रममाणस्य तव महाननेकाहान्यतिचक्राम ।

निर्व्यूढगुरुनिदेशं-
निर्वर्तितबुधमनोरथं पौराम् ।
रघुवरमिव सकलत्रं-
वीक्ष्य भवतश्चिराय नन्दन्तु ॥

राजा – (साभ्यर्थनं)

भवदीयचरणसेवा-
हेवा कः प्रेरयत्यवश्यं माम् ।
कालेत्रेयेऽप्यनुदिनं-
स एष मे भवतु धरणीभरणेऽपि ॥

(इति विश्लेषकातर्यमभिनयति)

त्रिकालवेदी – (समन्दस्मितं, क्षणमात्रं ध्यानमभिनयन्)

अनन्यसुलभाविद्या निरवद्येयमस्तु ते ।
सानुप्लवेन भवता सनाथीक्रियतां पुरी ॥

राजा – परमनुगृहीतोऽस्मि ।

त्रिकालवेदी–(सानन्दं) राजन् ! किं ते भूयः प्रियमुपहरामि ।

राजा.- (सादरपरितोषं) यदि मम स्वामी भगवान्प्रसन्नः ।
किमितः परं प्रियमस्ति । तथापीदमस्तु ।

[भरतवाक्यम्]

ब्राह्मं तेजःकल्पतां क्षत्रियाणां-
गुप्त्यै क्षात्रं सन्ततं ब्राह्मणानाम् ।
यद्वेदानामिन्दुमौलेःपरत्वं-
निस्सन्देहं तत्सतामाविरस्तु ॥

[इति निष्क्रान्तास्सर्वे]

॥ सप्तमोऽङ्कस्समाप्तः ॥

॥ नाटकं च परिसमाप्तम् ॥

अनुबन्धः -

श्रीः

।। भद्रकालीदण्डकम् ।।*

जय लोकैकजननी जयभक्तशुभप्रदे ! ।
जय कल्याणचरिते ! जय मातङ्गिकालिके ।।

जय जय जगदम्ब कादम्बबिम्बादरायान-बिम्बोकसम्बोधनव्याग्रतोदग्रजाग्रत्पदाम्भोरुह-द्वन्द्वयानेस्फुरद्वेदमाने । मुदा व्योमयाने सदा शोभमाने नतानेकदिक्पालजल्पाकतामेदुरांघ्रि-द्वयीमञ्जुमञ्जीरसिञ्जा विनोदे । गलद्भक्ततोदे ! जगत्पूज्यपादे ! हताऽऽमित्रवादे मुदेदेवि दिव्याङ्गनानामनङ्गारिशृङ्गारभङ्गीतरङ्गी भवद्भूरि सङ्गीतमङ्गीकरोषि । स्फुरच्चन्द्रिकामण्डला-खण्डवेतण्डशुण्डाप्रकाण्डोरुकाण्डात्तकौसुम्भ-चण्डातकोच्चण्ड चण्डांशुरुङ्मण्डली खण्डितोऽद्दण्ड-विद्यण्भाण्डांतरालस्थ घोरान्धकारे । स्ववश्यान्धकारे शिवे । कनककलशकान्ति पाटच्चरात्युच्च-वक्षोरुहद्वन्द्व सत्कुङ्कुमक्षोदसम्मेलनोद्दाममुक्तामणी-दामसम्पद्विडम्बावलम्बोक्त जाम्बूनदाद्रि प्रभाताम्र नक्षत्र जाले । वचोदूरलीले शिरोबद्धमाले परादूतकाले तटिच्चारुचेले नवाम्भोदनीले सुरीनृत्तलोले

---

*Text Page No. 122 to 123.

महेशानुकूले रमे गौरि बाले जगन्नर्तनागार-नृत्यज्जटाटीरकोटीर कोटीतटी नानटद्गाङ्गभङ्गालि-भङ्गावहात्मीयकीर्ते । दयासान्द्रमूर्ते ।

कनत्काञ्चनोदारकाञ्चीकलापांचलोदञ्चितस्फार-गारुत्मतद्योतदूर्वा नवाङ्कूर शङ्काकुलीभूतभूतेशहस्ताग्र-जाग्रकुरङ्गे । जगन्मङ्गले । विसरदमृतनिम्नगा-पूरमाधुर्यसोदर्य वाग्वैखरीसम्भवन्मौखरीकस्वहस्त-स्थलस्यापिकीरीपरीहासवाणी प्रवीणे करोद्भासिवीणे । स्तनाम्भोजकोश भ्रमायातलोलंब डिम्भावली शेमुषी पोषि रोमावली यामुनाम्बुप्रवाहान्तरावर्त सन्देहदायी नाभीपुटीबन्धुरो कम्बुजित्कन्धरे । प्रोल्लसत्पल्लवश्री तिरस्कारिदन्तछदाछविछन्नदन्तावली दाडिमीबीजसन्देह वेगागताकारकीरे । दृगुल्लासकल्लोलिनी पूर संवर्धितानेकमारे । कनत्कर्णपूरे । जगन्नायिके । कमलनयनभामिनी भारतीपाणिपङ्केरुहान्दोलिता-मन्दमन्दाकिनी बिन्दुनिन्दाकराकाराभृच्चामरोद्भूत वाताङ्कुरा धूतगन्धभ्रमद्भृङ्गवारे लसत्स्वेदनीरे दयालो कुमारे क्षणक्षाभितारे नतान्तर्विहारे चलत्तारहारे नखोद्यन्मुरारे सहायत्पुरारे महापापदूरे मनोवागतीते त्रिलोकप्रतीते शरण्ये वरेण्ये सुपुण्ये समस्त प्रशस्तत्रयीमस्तकास्तोकगीस्तोम संस्तूयमानाङ्घ्रिपद्मे सुपद्मे ।

शिवे देवि दुर्गे महादेवि तुभ्यं नमस्ते नमस्ते नमस्ते नमस्ते नमः ।

"शृङ्गारार्णव पूर्णचन्द्रकलिके सङ्गीतराज्याधिके
भक्ताभीष्टफलप्रदानरसिके फालान्तकस्तूरिके ।
पाकारातिमणीविनीलचिकुरे बन्धूकशोणाधरे
मूकानामपि सत्कवित्वसरणिःश्रीप्रायिके कालिके ॥
मन्दहासरुचि कन्दली सुधा
सान्द्रचन्द्रवदनोज्वले शिवे ।
मां मतङ्गकुलनन्दिनिस्फुर-
त्कीरपाणि कमलेऽम्ब ! पालय ॥

मणिमय कलशीमति प्रदाभ्या-
मवनतमध्यमसीमनिस्तनाभ्याम् ।
मघवदुपलधाम्निलीये
हरिहरवन्द्यपदारविन्दयुग्मे ॥

॥ श्रीभद्रकालीदण्डकं सम्पूर्णम् ॥

ஸ்ரீ:

ஸ்ரீ பத்ரகாளீ தண்டகம்*

ஜய லோகைக ஜனனி ! ஜய பக்த சுபப்ரதே ! ।
ஜய கல்யாணசரிதே ! ஜய மாதங்கிகாளிகே ! ॥ 1

ஜய ஜய ஜகதம்ப ! காதம்ப ! பிம்பாதராயான பிம்போகஸம்போதனவ்யக்ரதோதக்ர ஜாக்ரத்பதாம்போருஹத்வந்த்வயானே ஸ்புரத்வேதமானே முதா

* 'கலாநந்தகம் என்ற இந்நாடகத்தின் நான்காவது அங்கத்தில் இத்தோத்திரம் காணப்படுகிறது.

வ்யோமயானே ஸதா சோபமானே நதானேக திக்பாலஜல்பாகதா மேதுராங்க்ரித்வயீ மஞ்ஜுமஞ்ஜீர ஸிஞ்ஜாவிநோதே களத்பக்த தோதே ஜகத்பூஜ்ய பாதே ஹதாமித்ரவாதே முதே தேவி திவ்யாங்கநாநாமனங்காரி ச்ருங்கார பங்கீதரங்கீ பவத்பூரி ஸங்கீதமங்கீகரோஷி । 2

ஸ்புரச்சந்த்ரிகாமண்டலாகண்டவேதண்ட சுண்டா ப்ரகாண்டோரு காண்டாத்த கௌஸும்ப சண்டாத கோச்சண்டாம்சுருங்மண்டலீ கண்டிதோத்தண்ட வித்யண்டபாண்டாந்தராளஸ்த்தகோராந்தகாரே ஸ்வ-வச்யாந்த காரே சிவே । 3

கனக கலச காந்தி பாடச்சராத்யுச்ச வக்ஷோருஹ த்வந்த்வ ஸத்குங்கும க்ஷோதஸம்மேளனோத் தாமமுக்தாமணீதாம ஸம்பத்விடம்பாவலம்போத்க ஜாம்பூனதாத்ரி ப்ரபாதாம்ர நக்ஷத்ரஜாலே வசோதூரலீலே சிரோபத்தமாலே பராதூதகாலே. தடிச்சாருசேலே நவாம்போதநீலே சுரீந்ருத்த லோலே மகேசானுகூலே ரமே கௌரி பாலே ஜகந்நர்த்தனாகார ந்ருத்யஜ்ஜடாடீர கோடீரகோடீதட நாநடத்காங்க பங்காலி பங்காவஹாத்மீய கீர்த்தே தயாஸாந்த்ர மூர்த்தே । 4

கனத்காஞ்சநோதார காஞ்சீகலாபாம்சலோதஞ்சித ஸ்பாரகாருத்மத த்யோத தூர்வாநவாங்கூர சங்காகுலீபூத பூதேசஹஸ்தாக்ரஜாக்ரத் குரங்கே ஜகன்மங்களே । 5

விஸரத ம்ருத நிம்னகாபூர மாதுர்யஸோதர்ய வாக்வைகரீஸம்பவன்மௌகரீக ஸ்வஹஸ்த ஸ்தலஸ்தாபி கீர்பரிஹாஸவாணீ ப்ரவீணே । கரோத்பாஸிவீணே । 6

ஸ்தனாம்போஜகோச ப்ரமாயாதலோலம்ப டிம்பாவளீ சேமுஷீபோஷி ரோமாவளீயாமுனாம்பு ப்ரவாஹாந்தராவர்த்த ஸந்தேஹதாயீ நாபீபுடீபந்துரோ கம்புஜித் கந்தரே । 7

ப்ரோல்லஸத் பல்லவச்ரீ திரஸ்காரி தந்தச்சதாச்சசவிச்சன்ன தந்தாவளீ தாடீமீபீஜஸந்தேஹ வேகாகதாகார கீரே த்ருகுல்லாஸ கல்லோலிநீ பூர ஸம்வர்திதானேக மாரே கனத்கர்ண பூரே ஜகந்நாயிகே । 8

கமலநயனபாமினீ பாரதீபாணிபங்கேரு-ஹாந்தோளிதாமந்தமந்தாகினீ பிந்து நிந்தாகராகார-பிருச்சாமரோத்பூத வாதாங்குராதூத கந்தப்ரமத் ப்ருங்கவாரே லஸத்வேதநீரே தயோளோகுமாரே க்ஷணக்ஷாபிதாரே நதாந்தர் விஹாரே சலத்தாரஹாரே நகோத்யன் முராரே ஸஹாயத்புராரே மகாபாபதூரே மனோவாகதீதே த்ரிலோகப்ரதீதே சரண்யே வரேண்யே ஸபுண்யே ஸமஸ்த பிரசஸ்தத்ரயீ மஸ்தகா ஸ்தோக கீஸ்தோம ஸம்ஸ்தூய மானாங்க்ரி பத்மே ஸுபத்மே சிவே தேவி துர்கே மகாதேவி துப்யம் நமஸ்தே நமஸ்தே நமஸ்தே நம:

ச்ருங்காராணவ பூர்ணசந்த்ரகலிகே ஸங்கீத ராஜ்யாதிகே
பக்தாபீஷ்ட பலப்ரதான ரஸிகே பாலாந்த
கஸ்தூரிகே ।
பாகாராதி மணீ விநீல சிகுரே பந்தூக சோணாதரே
மூகானாமபி ஸத்கவித்வ ஸரணி: ச்ரீப்ராயிகே
காலிகே

மந்தஹாஸருசி கந்தளீ சுதா
ஸாந்த்ர சந்த்ர வதனோஜ்வலே சிவே
மாம் மதங்ககுல நந்தனிஸ்புரத்
கிரபாணி கமலேம்ப பாலய
மணிமய கலசீமதிபிரதாப்யாம்
அவநத மத்யம ஸீமநிஸ்தனாப்யாம்
மகவதுபலதாம்னிலீயே
ஹரிஹரவந்த்ய பதாரவிந்தயுக்மே

ஸ்ரீபத்ரகாளீ தண்டகம் ஸம்பூர்ணம்

Design & Printed @ VDJ Offset Printers Tnj. Ph : 230563